Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥

॥ मन्त्र ३१-श्लोक ३० ॥

करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥

॥ मन्त्र ३२-श्लोक ३१ ॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥

॥ मन्त्र ३३-श्लोक ३२ ॥

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥

॥ मन्त्र ३४-श्लोक ३३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इस प्रकार उत्पन्न हुए इस पुरुष को देवी ने अपने बाणों से और ढाल एवं तलवार से ही बींध डाला तब उसने अपना यह रूप परिवर्तित कर लिया और वह गजराज के रूप में आ गया ॥ श्लोक ३० ॥

गजराज के रूप में वह असुर गर्जना करता हुआ जब अपनी सूंड से देवी के सिंह को अपनी ओर खींचने लगा, इस बीच देवी ने अपनी तलवार से उसकी सूंड काट डाली ॥ श्लोक ३१ ॥

इसके बाद उस असुर ने पहले की तरह पुनः भैंसे का रूप धारण कर लिया और तीनों लोकों के चराचर प्राणियों को अपने क्रियाकलापों से संत्रस्त करने लगा ॥ श्लोक ३२ ॥

इस पर जगदम्बा चण्डिका क्रोधित होकर बार-बार उत्कृष्ट मधु का पान करने लगीं तथा उनके नेत्र रक्तवर्ण हो उठे ॥ श्लोक ३३ ॥

Straightway the goodess with her arrows swiftly pierced the man together with his scymitar and shield. Then he became a huge elephant. 30.

And tugged at her great lion with his trunk and roared, but the goddess cut off his trunk with her sword as he made his tugs. 31.

Next the great Asura assumed his buffalo shape again, and so shook the three worlds with all that is moveable and immoveable therein. 32.

Enraged thereat Caṇḍikā, the mother of the world, quaffed a sublime beverage again and again, and laughed as her eyes gleamed ruddy. 33.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥

॥ मन्त्र ३५-श्लोक ३४ ॥

सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥

॥ मन्त्र ३६—श्लोक ३५ ॥

देव्युवाच

॥ मन्त्र ३७ ॥

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥

॥ मन्त्र ३८—श्लोक ३६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अपने बल तथा पराक्रम के अभिमान में उन्मत्त होकर वह राक्षस उद्दण्डता से गजना करने लगा तथा बड़ी-बड़ी पर्वत शिलाओं को भगवती के ऊपर पटकने लगा ॥ श्लोक ३४ ॥

उन पर्वत शिलाओं को देवी ने अपने बाणों के प्रहार से चूर्ण कर दिया। उनका मुख मण्डल मधुपान करने से लाल रंग का हो उठा और वह हर्ष से उद्दीप्त हो गईं।

॥ श्लोक ३५ ॥

देवी ने कहा—अरे मूर्ख, मैं जब तक मधुपान करती हूं उस क्षण तक तू खूब गर्जना कर ले। जब मैं अपने हाथों से इसी स्थान पर शीघ्र ही तेरा वध करूंगी तब देवता लोग भी गर्जना करेंगे।

॥ श्लोक ३६ ॥

And the Asura roared out, puffed up with his strength and valour and frenzy, and hurled mountains against Caṇḍikā with his horns. 34

And she, shivering to atoms with showers of arrows those mountains that he hurled, spoke to him in confused words, while her mouth was rendered ruddier by the mead that she had drunk. 35.

The Goddess said :

Roar, roar on thy brief moment, O fool, the while I quaff this mead: The gods shall soon roar, when I shall slay thee even here. 36.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र ३९ ॥

एवमुक्त्वा समुत्पत्य सारुढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥

॥ मन्त्र ४०—श्लोक ३७ ॥

ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवातिदेव्या वीर्येण संवृतः ॥

॥ मन्त्र ४१—श्लोक ३८ ॥

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्वा निपातितः ॥

॥ मन्त्र ४२—श्लोक ३९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—यह कहकर देवी उछलीं, तथा उस महाअसुर पर चढ़ बैठी। और अपने पैरों से उसे दबाकर शूल के द्वारा उसके कण्ठ को आहत कर दिया ॥ श्लोक ३७ ॥

Exclaiming thus she leaped upwards and sat herself on that great Asura, and kicked him on the neck with her foot and struck him with her spear. 37.

देवी के पैरों से दब जाने पर भी महिषासुर अपने मुख के द्वारा अन्य रूप में बाहर निकलने लगा। वह आधा ही बाहर निकल पाया कि इसके पूर्व ही देवी ने अपने पराक्रम से उसे रोक दिया। ॥ श्लोक ३८ ॥

And thereupon he, being assailed by her foot, half issued forth from his own mouth in sooth. Being completely encompassed by the goddess' valour. 38.

आधा निकला हुआ होने पर भी जब वह महादैत्य महिषासुर देवी से युद्ध करने लगा, तब देवी ने तलवार से उस असुर का सिर काट कर नीचे गिरा दिया ॥ श्लोक ३९ ॥

That great Asura being thus attacked half issued forth indeed. The goddess struck off his head with her great sword and laid him low. 39.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥

॥ मन्त्र ४३—श्लोक ४० ॥

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥

॥ मन्त्र ४४—श्लोक ४१ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

महिषासुर के वध के पश्चात् सम्पूर्ण दैत्य सेना हाहाकार करती हुई भाग खड़ी हुई तथा देवता लोग अत्यन्त प्रसन्न हुए ॥ श्लोक ४० ॥

देवताओं ने सन्तुष्ट होकर महर्षियों सहित भगवती जगदम्बा की स्तुति की तथा गन्धर्वों और अप्सराओं ने गान एवं नृत्य कर विजय महोत्सव मनाया ॥ श्लोक ४१ ॥

मार्कण्डेय पुराण में सावर्णि से सम्बद्ध मन्वन्तर कथा के अन्तर्गत देवी माहात्म्य में महिषासुर वध नामक तृतीय अध्याय सम्पूर्ण हुआ ।

Then perished all that Daitya army with great lamentation. And all the hosts of the gods rose to the highest exultation. 40.

The gods and the great heavenly rishis poured forth praises to the goddess, the Gandharva chiefs burst into song and the bevies of Apsarases into dances. 41.

The Slaying of the Asura Mahisha concluded.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चतुर्थोऽध्यायः

ऋषिरुवाच

॥ मन्त्र १ ॥

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥

॥ मन्त्र २-श्लोक १ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

चतुर्थ अध्याय

देवताओं द्वारा देवी की स्तुति

देवी की विजय पर देवताओं ने उनकी स्तुति की। देवी ने उनको यह वर दिया था कि संकट के समय जब वे लोग उनका स्मरण करेंगे तब वे उनकी सदा सहायता करेंगी।

ऋषि ने कहा—भगवती द्वारा प्रबल बलशाली दुष्टात्मा महिषासुर तथा उसकी असुर सेना के विनाश कर देने के बाद इन्द्र आदि देवगणों ने नत-मस्तक होकर भगवती जगदम्बिका की श्रद्धा पूर्वक वन्दना और स्तुति की। उस समय अत्यन्त प्रसन्न होने के कारण देवताओं के शरीर रोमाँचित हो रहे थे॥ श्लोक १ ॥

THE DEVĪ MĀHĀTMYA

The gods poured forth their praises to Caṇḍikā *on her victory—And she gave them the boon that she would always befriend them, if they recalled her to mind in calamities.*

The ṛishi said :

When that most valiant evil-souled army of the gods' foes was vanquished by the goddess, Śakra and the hosts of other gods poured forth their praises to her with their voices, reverently bending down their necks and shoulders, while their bodies looked handsome because their hair stood erect with exultation. 1.

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

॥ मन्त्र ३-श्लोक २ ॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च नहि वक्तुमलं बलञ्च ।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवताओं ने कहा कि जिन भगवती ने अपनी शक्ति से सम्पूर्ण विश्व को व्याप्त कर रखा है तथा समस्त देवगणों की सम्मिलित शक्ति ही जिनका स्वरूप है उन देवताओं तथा ऋषियों की वन्दनीया भगवती जगदम्बिका को हम भक्तिभाव से प्रणाम करते हैं, वे हमारा कल्याण करें ।

॥ श्लोक २ ॥

The goddess, who stretched out this world by her power, Whose body comprises the entire powers of all the hosts of gods.

Her, Ambikā, worthy of worship by all gods and great ṛishis. We bow before in faith; may she ordain blessings for us ! 2.

जिन के अनुपम प्रभाव एवं बल का वर्णन करने में शेष नाग, ब्रह्मा तथा शंकर भी समर्थ नहीं हैं,

May she, whose peerless majesty and power
Ananta
Adorable, Brahma and Hara cannot in sooth
declare,

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥
॥ मन्त्र ४-श्लोक ३ ॥

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥
॥ मन्त्र ५-श्लोक ४ ॥

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वह भगवती चण्डिका अखिल ब्रह्माण्ड का परिपालन करने तथा संसार के अशुभ भय का नाश करने का विचार करें॥ श्लोक ३॥

May she, Caṇḍikā, to protect the entire world
And to destroy the fear of evil turn her mind ! 3.

भगवती सत्कर्मियों के घरों में लक्ष्मी के रूप में तथा पापात्माओं के घर में दरिद्रता बन कर निवास करती हैं एवं पवित्र हृदय लोगों के मन में बुद्धि के रूप में तथा सत्पुरुषों में श्रद्धा के रूप में और कुलीन लोगों में लज्जा के रूप में निवास करती हैं। उन भगवती को हम प्रणाम करते हैं। हे देवि ! आप विश्व का परिपालन करें।

॥ श्लोक ४॥

Her, who is good-Fortune herself in the dwellings of men of good deeds, Ill-Fortune
In those of men of sinful souls; who is
Intelligence in the hearts of the prudent,
Who is Faith in those of the good, and
Modesty in that of the high-born man.
Her, even thee, we bow before; protect the universe, O goddess ! 4.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥

॥ मन्त्र ६-श्लोक ५ ॥

हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥

॥ मन्त्र ७-श्लोक ६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आपके इस अचिन्त्य स्वरूप का तथा असुरों का विनाश करने वाले अद्‌भुत पराक्रम एवं समस्त देवों और दैत्यों के सम्मुख अनेक युद्धों में प्रकट किए गए अद्‌भुत चरित्रों का हम कैसे और किस प्रकार वर्णन कर सकते हैं क्योंकि आपका चरित्र वर्णनातीत है उसका वर्णन करना हमारी शक्ति से परे है।

॥ श्लोक ५ ॥

Can we describe this thy thought-transcending form ?
Or thy abundant surpassing valour that destroyed the Asuras ?
Or thy surpassing feats which were displayed in battles
Among all the hosts of Asuras, gods and others, O goddess ? 5.

भगवती आप ही सम्पूर्ण विश्व की उत्पत्ति का मूल कारण हैं तथा आप सत्व, रज एवं तम तीनों गुणों से सम्पन्न हैं, तथापि दोषों से आपका सामीप्य बिल्कुल ही नहीं दिखाई देता। विष्णु तथा शंकर आदि देवता भी आपका पार पा सकने में असमर्थ हैं अर्थात् वे आपकी शक्ति का ज्ञान भली भाँति नहीं कर सकते। आप ही अखिल विश्व को आश्रय देने वाली हैं। समस्त विश्व के कण में आपकी सत्ता विद्यमान है क्योंकि आप आद्या (आदि स्वरूपा) अव्याकृत और पराप्रकृति हैं ॥ श्लोक ६ ॥

Thou art the cause of all the worlds ! Though characterized by the three qualities, By faults Thou art not known ! Even by Hari, Hara and the other gods thou art incomprehensible !
Thou art the resort of all; thou art this entire world which is composed of parts !
Thou verily art sublime original Nature untransformed ! 6.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

यस्याः समस्तसुरतासमुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥

॥ मन्त्र ८-श्लोक ७ ॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता च
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥

॥ मन्त्र ९-श्लोक ८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हे देवि ! सभी प्रकार के यज्ञों में जिसका उच्चारण करने से देवता तृप्त हो जाते हैं वह स्वाहा स्वरूपिणी आप ही हैं। पितृमण्डल की तृप्ति के कारण रूप में भी आप ही अवस्थित हैं अतः आपको लोग स्वधा के रूप में भी सम्बोधित करते हैं ।

॥ श्लोक ७ ॥

Thou, whose complete divinity by means of utterance
Finds satisfaction in all sacrifices, O goddess,
Art verily Svahā, and givest satisfaction to the Pitṛi-hosts:
Hence thou art in truth declared by men to be Svadhā also. 7.

हे देवि ! कैवल्य किंवा मुक्तिलाभ की जो निमित्त हैं, अचिन्तनीय, अहिंसादिक महाव्रतों के स्वरूप में अवस्थित सम्पूर्ण दोषों से मुक्त, जितेन्द्रिय तथा ब्रह्मतत्व को ही सारभूत मानने वाले मुमुक्षु मुनि जनों का आधार तथा सनकादिक मुनिगण भी जिसकी शिक्षा ग्रहण करते हैं वह पराविद्या स्वरूपिणी आप ही हैं ॥ श्लोक ८ ॥

Thou art she, who effects final emancipation and performs great thought-transcending penances !
Thou studiest with the organs, which are the essence of strength, well-restrained !
With munis, who seek final emancipation and who have shed all their faults,
Thou art The Knowledge, adorable, sublime in sooth, O goddess ! 8.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्वजगतां परमार्त्तिहन्त्री ॥
॥ मन्त्र १०-श्लोक ६ ॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्ग ।
श्रीः कैटिभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥
॥ मन्त्र ११-श्लोक १० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आप शब्दब्रह्म स्वरूपिणी हैं, तथा सुविमल ऋक् और यजुष् की निधान हैं और साम (ध्वनि विशेष) उद्गीथ के रमणीय पद पाठ से संयुक्त सामवेद की भी आप ही आश्रय हैं। देवी त्रयी और वीर्यातिशालिनी (षड् ऐश्वर्य सम्पन्न) भगवती तथा संसार चक्र की प्रवर्तिका के रूप में आप ही प्रवृत्ति मार्ग (संसारोत्पत्ति) की नियामिका हैं और कृषि, वाणिज्य, पशु पालन आदि की भी प्रेरक हैं तथा तीनों भुवनों की सभी प्रकार की पीड़ाओं को नष्ट करने वाली हैं ॥ श्लोक ९ ॥

Sound is thy soul ! thou art the repository of the most spotless ṛic and yajus hymns, And of the sāmans, which have the charming-worded texts of the Ud-githa ! Thou as goddess art the triple Veda, the adorable, and for the existence and production Of all the worlds art active; thou art the supreme destroyer of their pains. 9.

आप मेधा स्वरूपिणी हैं तथा समस्त शास्त्रों के तत्त्वों की अधिष्ठात्री हैं। अनासक्त रूप से संसार रूपी दुर्गम समुद्र से पार करने वाली दुर्गा देवी के रूप में आप प्रतिष्ठित हैं। कैटभ दैत्य के एकमात्र शत्रु भगवान विष्णु के वक्षस्थल पर निवास करने वाली लक्ष्मी के रूप में आप ही विराजमान हैं तथा शंकर द्वारा समादृत भगवती गौरी भी आप ही हैं। ॥ श्लोक १० ॥

Thou art Mental Vigour, O goddess ! thou hast comprehended the essence of all the Scriptures ! Thou art Durgā; the boat to cross the difficult ocean of existence; devoid of attachments ! Thou art Srī, who has planted her dominion alone in the heart of Kaiṭabha's foe : Thou indeed art Gaurī, who has fixed her dweling in the moon-crested god ! 10.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ईषत्सहाससममलं परिपूर्णचन्द्र–
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥

॥ मन्त्र १२–श्लोक ११ ॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल–
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥

॥ मन्त्र १३–श्लोक १२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मन्दस्मित से युक्त, आपका मुखमण्डल पूर्णिमा के विमल चन्द्रबिम्ब के समान आह्लादक तथा श्रेष्ठ सुवर्ण की भाँति आकर्षक कान्ति से रमणीय है। तो भी यह बड़े आश्चर्य की बात है कि ऐसे आह्लादयुक्त सौम्य मुखमण्डल को देख कर भी महिषासुर नामक असुर ने क्रोधित होकर अकस्मात् ही आपके मुखमण्डल पर आघात किया।

॥ श्लोक ११ ॥

देवि ! आपका मुखमण्डल क्रोध से कुपित होने पर उदित होते हुए चन्द्र के सदृश रक्तवर्ण तथा तनाव युक्त भौंहों के कारण विकराल रूप में परिणत हुआ। किन्तु यह बड़े आश्चर्य की बात है कि उस मुखमण्डल को देख कर भी महिषासुर के प्राण पखेरू तत्काल ही नहीं निकले। क्रोध से परिपूर्ण यमराज को देख कर भला ऐसा कौन प्राणी होगा जो फिर जीवन धारण कर सके ॥ श्लोक १२ ॥

Slightly-smiling, spotless, resembling the full moon's
Orb, beautiful as the choicest gold, and lovely was thy face !
Yet't was very marvellous that, being swayed by anger,
The Asura Mahisha suddenly smote thy face when he saw it. 11.

But after seeing the wrathful face, O goddess, terrible with its frowns,
And sheeny in hue like the rising moon, that Mahisha
Did not forthwith yield up his life, It was passing wonderful:
For who can live after beholding the King of Death enraged ? 12.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवि प्रसीद परमाभवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत–
न्नीतं बलं सुविपुलं महिषासुरस्य ॥

॥ मन्त्र १४–श्लोक १३ ॥

ते संमता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥

॥ मन्त्र १५–श्लोक १४ ॥

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवि ! आप प्रसन्न हों। हे परमात्मस्वरूपिणि ! आपकी प्रसन्नता से विश्व का अभ्युदय होता है तथा क्रुद्ध होने पर आप क्षणमात्र में ही अनेकों वंशों का विनाश कर देती हैं। यह रहस्य अब ज्ञात हो गया क्योंकि आपके क्रोध से महिषासुर की बहुत बड़ी सेना विनाश को प्राप्त हो गई है।

॥ श्लोक १३ ॥

आप सदा अभ्युदय देने वाली हैं। आप जिन लोगों पर प्रसन्न होती हैं, वे देश-विदेश सभी में सम्मान्य हो जाते हैं तथा उन्हें विपुल सम्पत्ति तथा यश की उपलब्धि होती है। तथा उनके पुरुषार्थ से सम्बद्ध धार्मिक क्रिया-कलाप कभी क्षीण नहीं होते और वे ही लोग विनीत पुत्र, भृत्य (नौकर चाकर) तथा गृहिणी से युक्त धन्य भाग्य माने जाते हैं एवं आपकी कृपा से उनका अभ्युदय होता रहता है।

॥ श्लोक १४ ॥

Be gracious, O goddess, as supreme lady, to life ;
When enraged thou forthwith destoryest whole families !
Known at this very moment is this, that here is brought to its end
The Asura Mahisha's most extensive might ! 13.

Esteemed are they among the nations, theirs are riches,
Theirs are glories, and their sum of right-eousness perishes not,
Happy are they indeed, and they possess devoted children, servants and wives,
On whom thou, well-pleased, dost always bestow prosperity, O lady ! 14.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

॥ मन्त्र १६-श्लोक १५ ॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीवशुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥

॥ मन्त्र १७-श्लोक १६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवति ! आपके ही अनुग्रह से पुण्य पुरुष आदरपूर्वक प्रतिदिन धार्मिक कृत्यों को सम्पन्न करते हैं तथा स्वर्ग लाभ करते हैं। अतएव प्रसन्न होकर तीनों लोकों में आप अभीष्ट फल प्रदान करती हैं। ॥ श्लोक १५ ॥

All righteous actions ever indeed, O goddess,
With utmost respect the man of good deeds daily performs,
And gains heaven thereafter by thy favour, O lady.
Dost thou not by him bestow rewards even on the three worlds, O goddess ? 15.

हे माँ दुर्गे ! स्मरण करने मात्र से ही आप सांसारिक प्राणियों का भय दूर कर देती हैं तथा स्वस्थ लोगों द्वारा स्मरण करने पर उनको आप अत्यन्त फल देने वाली बुद्धि प्रदान करती हैं। आप दरिद्रता के दुख का भय भी निर्मूल कर समस्त प्राणियों को उपकृत करने के लिए सदा सर्वदा करुणाशालिनी रहती हैं ॥ श्लोक १६ ॥

Thou, O Durgā, when called to mind, dost remove terror from every creature :
Thou, when called to mind by those in health, dost bestow a mind extremely bright :
What goddess but thou, O dispeller of poverty, pain and fear,
Hast ever benevolent thoughts in order to work benefits to all ? 16.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान्विनिहंसि देवि ॥

॥ मन्त्र १८-श्लोक १७ ॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥

॥ मन्त्र १९-श्लोक १८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवति, आप इन दैत्यों का विनाश इसलिए करती हैं कि विश्व सुखी बने तथा वे लोग दीर्घकाल तक नरकवास करने हेतु—पाप कर्मों में ही चाहे संलग्न क्यों न हों तथापि आप इन शत्रुओं का नाशकर उन्हें मृत्यु का वरण कराकर सीधे स्वर्ग पहुँचाती हैं, यह आपकी असीम कृपा है ।

॥ श्लोक १७ ॥

यदि आप चाहें तो समस्त दैत्य समुदाय को केवल अपनी दृष्टि डालकर ही भस्म कर सकती हैं किन्तु आप शस्त्रों के द्वारा ही उनको नष्ट करना उपयुक्त मानती हैं, क्योंकि आप उदार हृदया हैं अतः आप चाहती हैं कि वे दैत्य लोग आपके शस्त्रों के प्रहार से पवित्र होकर श्रेष्ठ लोकों की प्राप्ति करें ॥ श्लोक १८ ॥

By these slain foes the world attains
to happiness; thus let these
Forsooth practise sin so as to descend to
hell for long !
Meeting death in battle let them proceed
to heaven—
Thinking thus, thou dost assuredly destroy
the enemies, O goddess. 17.

Having indeed seen them, why dost thou
not, O lady, reduce to ashes,
All the Asuras, since thou directest thy
weapons against the foes ?
Let even enemies, purified by dying in
arms, attain in sooth to the bright worlds—
Such is thy most kindly intention towards
even them. 18.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड–
योग्याननं तव विलोकयतां तदेतत् ॥

॥ मन्त्र २०–श्लोक १९ ॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृहृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥

॥ मन्त्र २१–श्लोक २० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देबि ! आपके पवित्र खड्ग के प्रभापुंज के प्रकाश से तथा उग्र त्रिशूल की धार की कांति की चकाचौंध से दैत्य लोगों ने अपने नेत्रों की ज्योति इसीलिए नहीं खोयी क्योंकि वे चन्द्रमा के समान आपके सुन्दर किरणों से युक्त मुखचन्द्र का दर्शन कर रहे थे ॥ श्लोक १९ ॥

भगवति ! आपका अद्भुत चरित्र दुष्टात्माओं के दुष्कर्मों को नष्ट करने वाला है तथा आपका अतुलनीय स्वरूप अचिन्त्य है अर्थात् वह चिन्तन से परे है। आपका यह शौय तथा बल उन भयंकर असुरों का ही संहार करने वाला है जिन्होंने किसी काल विशेष में देवताओं को पराजित कर दिया था। आप अपने बैरियों पर सदा ही दयाल रही हैं ॥ श्लोक २० ॥

And though, neither by the sharp flashes
of abundant light from thy scymitar,
Nor by the copious lustre of thy spear-
point, the eyes of the Asuras,
Were destroyed; yet, as they gazed upon
thy countenance
Which bore a portion of the radiant moon,
this very thing happened. 19.

Thy disposition, O goddess, subdues the
conduct of men of evil conduct;
And this thy form surpasses thought and
rivalry by others;
And thy valour vanquishes those who have
robbed the gods of their prowess;
Thou hast as it were manifested pity thus
even on enemies. 20.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥

॥ मन्त्र २२-श्लोक २१ ॥

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥

॥ मन्त्र २३-श्लोक २२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आपके इस अद्भुत बल की तुलना नहीं की जा सकती और आपका मनोहारी स्वरूप जो शत्रुओं को भयभीत कर देता है वह संसार में दुर्लभ है। आपके हृदय में सदैव दयालुता रहती है किन्तु युद्ध क्षेत्र में निष्ठुरता। ये गुण तीनों लोकों में केवल आप में ही विद्यमान हैं, अन्य किसी में नहीं।

॥ श्लोक २१ ॥

भगवति ! आपने शत्रुओं का संहार कर इस सम्पूर्ण त्रिलोकी को बचाया है तथा आपने समस्त दैत्यों को युद्ध क्षेत्र में प्राणहीन करके स्वर्गलोक में पहुँचाया है। इस प्रकार भयंकर उन्मत्त दैत्यों से भयभीत हम लोगों को आपने भयमुक्त किया है। यह आपकी असीम अनुकम्पा है। हम देवगण आपको प्रणाम करते हैं॥ श्लोक २२ ॥

To what may this thy prowess be compared ?
And whereto thy form most charming,
which strikes fear among foes ?
Compassion in mind and relentlessness in
battle are seen
In thee, O goddess, who bestowest boons
even on the three worlds. 21.

Through the destruction of the foes, these
three worlds entire,
Have been saved by thee. Having slain
them in the battle-front
Thou hast led even those hosts of foes to
heaven, and dispelled the fear.
Which beset us from the frenzied foes of
the gods. Reverence to thee ! 22.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

॥ मन्त्र २४-श्लोक २३ ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥

॥ मन्त्र २५-श्लोक २४ ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥

॥ मन्त्र २६-श्लोक २५ ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥

॥ मन्त्र २७-श्लोक २६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवि ! आप त्रिशूल से हमारी रक्षा करो तथा हे अम्बिके ! आप अपने खड्ग से हमारी रक्षा करो और घण्टे की ध्वनि एवं धनुष की टंकार से भी आप हमारी रक्षा करो ॥ श्लोक २३ ॥

पूर्व, पश्चिम तथा दक्षिण इन तीनों ही दिशाओं में सभी प्रकार के भयों से हे चण्डिके ! आप हमारी रक्षा करें तथा हे ईश्वरि ! आप अपने त्रिशूल को घुमाते हुए उत्तर दिशा में हमारी रक्षा करें ॥ श्लोक २४ ॥

तीनों लोकों में वे जीवात्माएं जो सुन्दर तथा भयंकर रूप धारण करके विचरण करती हैं उनसे भी आप हम लोगों की तथा इस संसार की रक्षा करें ॥ श्लोक २५ ॥

हे जगदम्बिके ! खड्ग, शूल एवं गदा आदि विभिन्न अस्त्रों को आप अपने कर-पल्लवों में सदा धारण किये रहती हैं अतः आप उनके द्वारा हमारी सब प्रकार से रक्षा करें ॥ श्लोक २६ ॥

With thy spear protect us, O goddess !
Protect us with thy sword also, O Ambikā !
By the clanging of thy bell protect us,
And by the twanging of the thong
of thy bow ! 23.

In the east guard us, and in the west;
O Caṇḍikā, guard us in the south
By the brandishing of thy spear,
And also in the north, O goddess ! 24.

Whatever gentle forms of thee wander about
in the three worlds,
And whatever exceedingly terrible forms
wander, by means of them guard us
and the earth ! 25.

Thy sword and spear and club, and what-
ever other weapons, O Ambikā,
Rest in thy pliant hand, with them guard
us on every side ! 26.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र २८ ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥

॥ मन्त्र २९—श्लोक २७ ॥

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥

॥ मन्त्र ३०—श्लोक २८ ॥

देव्युवाच

॥ मन्त्र ३१ ॥

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।

॥ मन्त्र ३२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—इस तरह देवगण ने भगवती जगदम्बिका की स्तुति की तथा पवित्र नन्दन-वन के सुन्दर पुष्पों तथा चन्दन आदि सुगन्धित द्रव्यों से उनकी अर्चना की ॥ श्लोक २७ ॥

देवताओं ने भक्ति भाव से सभी प्रकार की दिव्य सुगन्धियां देवी को अर्पित कीं, तब देवी दुर्गा ने प्रसन्नता पूर्वक प्रणाम करते हुए देवों से कहा—॥ श्लोक २८ ॥

हे देवो ! आप लोग अपना अभीष्ट वर माँगो ।

The ṛishi said :

Thus was she, the Upholder of the worlds, hymned by the gods, and they paid honour to her with celestial flowers that blossomed in Nandana, and with perfumes and unguents. 27.

Moreover all the thirty gods in faith censed her with heavenly incenses. Benignly sweet in countenance she spoke to all the prostrate gods. 28.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवा ऊचुः

॥ मन्त्र ३३ ॥

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।

॥ मन्त्र ३४—श्लोक २९ ॥

यदयं निहतः शत्रुरस्माकं महिषासुरः ।
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥

॥ मन्त्र ३५–श्लोक ३० ॥

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥

॥ मन्त्र ३६–श्लोक ३१ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

The goddess said :

Choose, ye thirty all ! whatever ye desire of me, for I grant it with pleasure, being highly honoured by these hymns. 28.

The gods said :

Thou, O adorable lady, hast accomplished all, nought remains undone, in that this Asura Mahisha, our foe has been slain. 29.

Yet if thou must grant us a boon, O goddess great ! whenever we call thee, call thee to mind, do thou away with our direst calamities ! 30–31.

देवताओं ने कहा—हे भगवति ! आपने हमारी सभी आकांक्षाओं को पूर्ण कर दिया है, अब हमारी कोई भी इच्छा शेष नहीं है ॥ श्लोक २९ ॥

यद्यपि हमारा परम शत्रु महिषासुर आपके द्वारा मारा गया है, तथापि यदि आप मह पर और अधिक कृपा कर कोई वरदान देना चाहती हैं तो आप हमें यही वरदान दें कि हम जब कभी भी आपका स्मरण करें आप हमें अपना दिव्य दर्शन देकर हमारी कठिन विपत्तियों को दूर करें ।

॥ श्लोक ३०–३१ ॥

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् ।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ।

॥ मन्त्र ३७-श्लोक ३२ ॥

ऋषिरुवाच

॥ मन्त्र ३८ ॥

इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥

॥ मन्त्र ३९-श्लोक ३३ ॥

इत्येतत्कथितं भूप संभूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥

॥ मन्त्र ४०-श्लोक ३४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हे अम्बिके ! इसके अतिरिक्त आप हम पर यह भी कृपा करें कि जो कोई भी इन स्तुतियों से आपकी स्तुति करे उसे आप सुख समृद्धि प्रदान करें तथा स्त्री, पुत्र, सम्पत्ति आदि की वृद्धि हेतु सदैव हम पर अपनी प्रसन्नता बनाए रखें ॥ श्लोक ३२ ॥

ऋषि ने कहा—हे राजन् ! इस प्रकार स्तुति करके जब देवताओं ने अपने तथा सम्पूर्ण विश्व के कल्याण के लिए भगवती, भद्रकाली को प्रसन्न किया तब वे 'तथास्तु' कहकर तुरन्त ही अन्तर्धान हो गईं । ॥ श्लोक ३३ ॥

हे राजन् ! पूर्व समय में तीनों लोकों का कल्याण करने वाली भगवती जगदम्बिका जिस प्रकार देवताओं के शरीरों से प्रकट हुईं वह कथा मैंने तुम्हें सुना दी है ॥ श्लोक ३४ ॥

And whatever mortal shall praise thee with these hymns, O lady of spotless countenance, to prosper him in wealth and wife and other blessings by means of riches, success and power do thou incline always, O Ambikā, who art propitious to us ! 32.

The ṛishi said :

Being thus propitiated by the gods for the good of the world and on their own behalf, "Be it so !" said she, Bhadrakālī; and vanished from their sight, O king ! 33.

Thus I have narrated this, O king, how the goddess came into being of yore out of the gods' bodies, she who desires the good of all the three worlds. 34.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुनश्च गौरी देहासा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥

॥ मन्त्र ४१-श्लोक ३५ ॥

रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥

॥ मन्त्र ४२-श्लोक ३६ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पुनः देवताओं का कल्याण करने वाली भगवती, तथा दुष्ट दैत्यों शुम्भ-निशुम्भ का वध करके त्रिलोकी की रक्षा करने हेतु जिस प्रकार गौरी देवी के शरीर से प्रकट हुई वह कथा यथावत् सुना रहा हूं ।

॥ श्लोक ३५–३६ ॥

मार्कण्डेयपुराण में सावर्णि से सम्बद्ध मन्वन्तर-कथा के अन्तर्गत देवी-माहात्म्य में शक्रादि-स्तुति नामक चतुर्थ अध्याय सम्पूर्ण हुआ ।

And again she came into existence having the body of Gaurī, just as she did before, in order to slay the wicked Daityas and Śumbha and Niśumbha and to preserve the worlds, as benefactress of the gods. Hearken then to what I have declared to thee. I have truly told it to thee. 35–36.

The end of the Gods' prayer to Caṇḍikā

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथाध्यायनवकात्मकमुत्तरचरित्रमारभ्यते

पञ्चमोऽध्यायः

ऋषिरुवाच

॥ मन्त्र १ ॥

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥

॥ मन्त्र २–श्लोक १ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

उत्तर चरित्र

पंचम अध्याय

देवी दूत संवाद

शुम्भ और निशुम्भ ने देवताओं को पराजित कर स्वर्ग से निकाल दिया। देवताओं ने हिमायल जाकर चण्डिका का आह्वान किया। पार्वती की देह से चण्डिका प्रकट हुईं। शुम्भ और निशुम्भ के दूतों ने देवी के सौन्दर्य की शुम्भ से प्रशंसा की। शुम्भ ने दूत भेज कर देवी को विवाह का आमन्त्रण दिया। देवी ने कहा कि उनका संकल्प है कि वे उससे विवाह नही करेंगी जो उन्हें युद्ध में हरा न सके।

ऋषि ने कहा—प्राचीन समय में शुम्भ और निशुम्भ नाम के महादैत्यों ने अपने शौर्य एवं पराक्रम के अभिमान में शचीपति इन्द्र को तीनों लोकों के राज्य तथा यज्ञ भाग से वंचित कर उसे अपने अधिकार में कर लिया। ॥ श्लोक १ ॥

THE DEVĪ MĀHĀTMYA

The goddess' conversation with the Asura's messenger.

The Asuras Śumbha aud Niśumbha conquered the gods and drove them, from heaven.—The gods invoked Çaṇḍikā at Himāvat in a hymn, appealing to her by all her attributes to help them—Pārvatī came there and Çaṇḍikā sprang, forth fram her body.—The servants of Śumbha and Niśumbha saw her and extolled her perfect beauty to Śumbha.—He sent a messenger to invite her to marry him.—She explained that by a vow she could marry no one who did not conquer her in fight.

The ṛishi said :

Of yore the Asuras Śumbha and Niśumbha trusting in their pride and strength, robbed Śaci's lord of the three worlds and of his portions of the sacrifices. 1.

तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
कौवेरमथ याम्यं च चक्राते वरुणस्य च ॥

॥ मन्त्र ३-श्लोक २ ॥

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥

॥ मन्त्र ४-श्लोक ३ ॥

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥

॥ मन्त्र ५-श्लोक ४ ॥

तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥

॥ मन्त्र ६—श्लोक ५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इसके अतिरिक्त ये दोनों ही दत्य सूर्य, चन्द्र, कुवेर, यम तथा वरुण आदि देवताओं के अधिकारों पर भी अपना स्वामित्व स्थापित कर उनका उपयोग करने लग गये ॥ श्लोक २ ॥

They both usurped likewise the sun's dignity and the moon's dominion, and Kuvera's and Yama's and Varuṇa's. 2.

वायुदेव तथा अग्निदेव का कार्यक्षेत्र भी उनका अपना हो गया। इस तरह उन दोनों महान् असुरों ने सभी देवों को अपमानित, राज्यच्युत तथा पराजित कर स्वर्ग लोक से निष्कासित कर दिया। ॥ श्लोक ३ ॥

And they both exercised Vāyu's authority and Agni's sphere of action. Thereby the gods were scattered, deprived of their sovereignties and put to rout. 3.

उन दोनों महाअसुरों द्वारा पराजित तथा अधिकार विहीन देवताओं ने भगवती अपराजिता की वंदना की ॥ श्लोक ४ ॥

The thirty gods, bereft of their dominion and set at nought by those two great Asuras, all recall to mind that never-vanquished goddess : 4.

पूर्व में जगदम्बा ने हमें वर दिया था कि संकट के समय मेरा स्मरण करने मात्र से मैं सभी प्रकार के संकटों का तत्क्षण ही नाश कर दूंगी। ॥ श्लोक ५ ॥

Thou didst grant us the boon, 'As ye when in calamities shall call me to mind, that very moment will I put an end to all your direst calamities.' 5.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥

॥ मन्त्र ७—श्लोक ६ ॥

देवा ऊचुः

॥ मन्त्र ८ ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

॥ मन्त्र ९—श्लोक ७ ॥

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमोनमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥

॥ मन्त्र १०-श्लोक ८ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इस प्रकार यह स्मरण करके देवता लोग पर्वतराज हिमालय के पास गए और वहाँ उन्होंने भगवती विष्णुमाया का स्तवन किया ॥ श्लोक ६ ॥

देवताओं ने कहा—हे कल्याणकारिणि देवि ! आपको हम प्रणाम करते हैं। महादेवी शिवा को हमारा सदैव प्रणाम स्वीकार हो। हम नित्य प्रकृति एवं भद्रा को प्रणाम करते हैं ॥ श्लोक ७ ॥

भगवती रौद्रा एवं नित्या, गौरी और धात्री को भी प्रणाम करते हैं। चन्द्ररूपिणी भगवती ज्योत्स्ना और सुखा को प्रणाम करते हैं।
॥ श्लोक ८ ॥

Making this resolve the gods went to Himāvat, lord among mountains, and there raised their hymn to the goddess, who is Vishṇu's illusive power. 6.

The gods said :

Reverence to the goddess, to the great goddess !
To her who is auspicious reverence perpetually !
Reverence to Prakṛiti the good !
Submissive we fall prostrate before her ! 7.

Reverence to her who is terrible, to her who is constant !
To Gauri, to Dhātrī reverence, yea reverence !
And to the Moon-light, to her who has the moon's form,
To her who is happy, reverence continually !
8.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कल्याण्यै प्रणता वृद्धचै सिद्धचै कुर्मो नमोनमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमोनमः ॥

॥ मन्त्र ११-श्लोक ९ ॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥

॥ मन्त्र १२-श्लोक १० ॥

अतिसौम्यातिरौद्रायै नतास्तस्यै नमोनमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमोनमः ॥

॥ मन्त्र १३-श्लोक ११ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सभी प्रकार के कल्याण करने वाली, भगवती कल्याणी को, धन-धान्य एवं सुखों की वृद्धि करने वाली वृद्धि को तथा सभी सिद्धियों को प्रदान करने वाली सिद्धि को हम प्रणाम करते हैं। तथा नैर्ऋति, राजलक्ष्मी और शर्वाणी स्वरूप में अवस्थित हे अम्बिके ! हम आपको बारम्बार प्रणाम करते हैं ॥ श्लोक ९ ॥

भगवती दुर्गा, भीषण संकटों से उद्धार करने वाली देवी दुर्गपारा, सारभूता, तथा जो सभी कार्यों की कारण हैं, उन सर्वकारिणी को हम प्रणाम करते हैं। ख्याति तथा कृष्णा एवं भगवती धूम्रा को भी हम निरन्तर प्रणाम करते हैं।

॥ श्लोक १० ॥

अति सौम्या, तथा अति रौद्ररूपवाली रौद्ररूपा को हम प्रणाम करते हैं। जो इस चराचर विश्व का आधार हैं उन कृति देवी को हम प्रणाम करते हैं ॥ श्लोक ११ ॥

Falling prostrate, to her who is propitious, to Prosperity,
To Perfection let us pay reverence, yea reverence !
To Nirṛiti, to the goddess of Good-Fortune of kings,
To thee, Sarvāṇī, reverence, yea reverence ! 9.

To Durgā, to her who is a further shore difficult to be reached,
To her who is essential, to her who works all things,
And to Fame also, to her who is blue-black,
To her who is smoke-dark reverence continually ! 10.

Before her who is at once most gentle and most harsh,
We fall prostrate; to her reverence, yea reverence !

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै(१४) नमस्तस्यै(१५) नमस्तस्यै नमोनमः ॥

॥ मन्त्र १६-श्लोक १२ ॥

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै(१७) नमस्तस्यै(१८) नमस्तस्यै नमोनमः ॥

॥ मन्त्र १९-श्लोक १३ ॥

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै(२०) नमस्तस्यै(२१) नमस्तस्यै नमोनमः ॥

॥ मन्त्र २२-श्लोक १४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवती का वह स्वरूप जो विश्व में विष्णु-माया के नाम से विख्यात हैं, उनको हम कायिक, वाचिक एवं मानसिक प्रणाम करते हैं।

॥ श्लोक १२ ॥

जो देवी प्राणियों में चेतना के रूप में अवस्थित हैं उनको हम कायिक, वाचिक एवं मानसिक प्रणाम करते हैं ॥ श्लोक १३ ॥

जो भगवती प्राणियों में बुद्धितत्त्व के रूप में विद्यमान हैं उनको हम कायिक, वाचिक एवं मानसिक प्रणाम करते हैं॥ श्लोक १४ ॥

Reverence to her who is the foundation of the world !
To the goddess who is Action reverence, yea reverence ! 11.

To the goddess who among all created things
Is called Vishṇu's illusive power !
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
12.

To the goddess who among all created beings
Bears the name Consciousness,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
13.

To the goddess who among all created beings,
Stands firm with the form of Intellect,
Reverence to her, yea reverence to her !
Reverence to her, reverence yea reverence !
14.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै(२३) नमस्तस्यै(२४) नमस्तस्यै नमोनमः ॥

॥ मन्त्र २५-श्लोक १५ ॥

या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै(२६) नमस्तस्यै(२७) नमस्तस्यै नमोनमः ॥

॥ मन्त्र २८-श्लोक १६ ॥

या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै(२९) नमस्तस्यै(३०) नमस्तस्यै नमोनमः ॥

॥ मन्त्र ३१-श्लोक १७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

समस्त प्राणियों में निद्रा के रूप में रहने वाली निद्रारूपिणी देवी को हम कायिक, वाचिक, तथा मानसिक प्रणाम करते हैं ॥ श्लोक १५ ॥

To the goddess who among all created beings
Stands firm with the form of Sleep,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
15.

जो प्राणियों में क्षुधा जाग्रत करती हैं उनको हम कायिक, वाचिक और मानसिक प्रणाम करते हैं ॥ श्लोक १६ ॥

To the goddess who among all created beings
Stands firm with the form of Hunger,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence.
16.

समस्तप्राणी जिसके प्रतिबिम्ब रूप हैं उन छाया रूपिणी देवी को हम कायिक, वाचिक, तथा मानसिक प्रणाम करते हैं ॥ श्लोक १७ ॥

To the goddess who among all created beings
Stands firm with the form of Shadow,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
17.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै(३२) नमस्तस्यै(३३) नमस्तस्यै नमोनमः ।।

॥ मन्त्र ३४-श्लोक १८ ॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै(३५) नमस्तस्यै(३६) नमस्तस्यै नमोनमः ।।

॥ मन्त्र ३७-श्लोक १९ ॥

या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।।
नमस्तस्यै(३८) नमस्तस्यै(३९) नमस्तस्यै नमोनमः ।।

॥ मन्त्र ४०-श्लोक २० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जो भगवती प्राणिमात्र की शक्तियों का स्रोत हैं उन देवी को हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं॥ श्लोक १८ ॥

To the goddess who among all created beings
Stands firm with the form of Energy,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
18.

देवी का जो स्वरूप प्राणिमात्र में उपभोग की अभिलाषा उत्पन्न करता है, उस तृष्णा रूप को हम कायिक, वाचिक और मानसिक प्रणाम करते हैं॥ १९ ॥

To the goddess who among all created beings
Stands firm with the form of Thirst,
Reverence to her, yea reverence to her!
Reverence to her, reverence, yea reverence !
19.

क्षान्तिरूपा देवी जो समस्त प्राणियों में क्षमा का भाव उत्पन्न करती हैं। उन्हें हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं।
॥ श्लोक २० ॥

To the goddess who among all created beings
Stands firm with the form of Patience,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
20.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै(४१) नमस्तस्यै(४२) नमस्तस्यै नमोनमः ॥

॥ मन्त्र ४३-श्लोक २१ ॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै(४४) नमस्तस्यै(४५) नमस्तस्यै नमोनमः ॥

॥ मन्त्र ४६-श्लोक २२ ॥

या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै(४७) नमस्तस्यै(४८) नमस्तस्यै नमोनमः ॥

॥ मन्त्र ४९-श्लोक २३ ॥

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै(५०) नमस्तस्यै(५१) नमस्तस्यै नमोनमः ॥

॥ मन्त्र ५२-श्लोक २४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जातिरूप में अवस्थित देवी जो जातिभेद के आधार पर प्राणियों का वर्गीकरण करती हैं उनको हम कायिक, वाचिक एवं मानसिक प्रणाम करते हैं।

॥ श्लोक २१ ॥

भगवती लज्जा देवी जो प्राणियों में लज्जा का भाव उत्पन्न करने वाली हैं उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं।

॥ श्लोक २२ ॥

शान्तिभाव का उदय कर शान्ति स्थापित करने वाली शान्तिस्वरूपा देवी को हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं।

॥ श्लोक २३ ॥

जो देवी सब प्राणियों में श्रद्धा के रूप में विद्यमान रहती हैं उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं॥ श्लोक २४ ॥

To the goddess who among all created beings
Stands firm with the form of Speciality,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
21.

To the goddess who among all created beings
Stands firm with the form of Modesty,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
22.

To the goddess who among all created beings
Stands firm with the form of Peaceableness,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
23.

To the goddess who among all created beings
Stands firm with the form of Faith,
Reverence to her, yea, reverence to her !
Reverence to her, reverence, yea reverence !
24.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै(५३) नमस्तस्यै(५४) नमस्तस्यै नमोनमः ।।

।। मन्त्र ५५-श्लोक २५ ।।

या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै(५६) नमस्तस्यै(५७) नमस्तस्यै नमोनमः ।।

।। मन्त्र ५८-श्लोक २६ ।।

या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै(५९) नमस्तस्यै(६०) नमस्तस्यै नमोनमः ।।

।। मन्त्र ६१-श्लोक २७ ।।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवती कान्तिरूपिणी जो प्राणियों के उज्वल रूप तथा उनकी शोभा बढ़ाने वाली हैं उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं।

॥ श्लोक २५ ॥

देवी का जो स्वरूप प्राणिमात्र के लिए लक्ष्मी रूप में स्थित है वह कायिक वाचिक, मानसिक तीनों ही प्रणाम स्वीकार करें॥ श्लोक २६ ॥

जो भगवती विभिन्नरूपों में संसार की आजीविका का आधार हैं, उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं।

॥ श्लोक २७ ॥

To the goddess who among all created beings
Stands firm with the form of Loveliness
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
25.

To the goddess who among all created beings
Stands firm with the form of Good-Fortune,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
26.

To the goddess who among all created beings
Stands firm with the form of Activity,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
27.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै(६२) नमस्तस्यै(६३) नमस्तस्यै नमोनमः ॥
॥ मन्त्र ६४-श्लोक २५ ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै(६५) नमस्तस्यै(६६) नमस्तस्यै नमोनमः ॥
॥ मन्त्र ६७-श्लोक २६ ॥

या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै(६८) नमस्तस्यै(६९) नमस्तस्यै नमोनमः ॥
॥ मन्त्र ७०-श्लोक ३० ॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै(७१) नमस्तस्यै(७२) नमस्तस्यै नमोनमः ॥
॥ मन्त्र ७३-श्लोक ३१ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

जो देवी स्मरण शक्ति के रूप में समस्त प्राणिजगत् में व्याप्त हैं, उनको हम कायिक,वाचिक तथा मानसिक प्रणाम करते हैं ॥ श्लोक २८ ॥

To the goddess who among all created beings
Stands firm with the form of Memory,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
28.

जो प्राणियों में दया का भाव जाग्रत करती हैं, उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं ॥ श्लोक २९ ॥

To the goddess who among all created beings
Stands firm with the form of Mercy,
Reverence to her, yea reverence to her
Reverence to her, reverence, yea reverence !
29.

जो प्राणियों की इच्छाओं को सन्तुष्ट करती हैं, उन तुष्टिरूपा देवी को कायिक, वाचिक तथा मानसिक तीनों प्रणाम स्वीकार हों ॥ श्लोक ३० ॥

To the goddess who among all created beings
Stands firm with the form of Contentment,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
30.

जो देवी प्राणिमात्र की जननी हैं उन जगज्जननी मातृरूपा को हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं ॥ श्लोक ३१ ॥

To the goddess who among all created beings
Stands firm with the form of Mother,

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै(७४) नमस्तस्यै(७५) नमस्तस्यैन मोनमः ॥

॥ मन्त्र ७६-श्लोक ३२ ॥

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमोनमः ॥

॥ मन्त्र ७७-श्लोक ३३ ॥

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै(७८) नमस्तस्यै(७९) नमस्तस्यैन मोनमः ॥

॥ मन्त्र ८०-श्लोक ३४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
31.

जो देवी सांसारिक प्राणियों में भ्रान्ति का कारण हैं, उनको हम कायिक, वाचिक तथा मानसिक प्रणाम करते हैं ॥ श्लोक ३२ ॥

To the goddess who among all created beings
Stands firm with the form of Error,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
32.

जो देवी समस्त प्राणियों की इन्द्रियों की अधिष्ठात्री हैं तथा निरन्तर उनमें अवस्थित रहती हैं उन व्याप्तिदेवी को हम बारम्बार प्रणाम करते हैं ॥ श्लोक ३३ ॥

To her who both governs the organs of sense
Of created beings, and rules among all
Created beings perpetually,—to her
The goddess of Pervasiveness reverence, yea reverence ! 33.

चैतन्यस्वरूपा भगवती जो अखिल विश्व में व्यापक रूप में अवस्थित हैं, उनको कायिक, वाचिक तथा मानसिक प्रणाम स्वीकार हो ।
॥ श्लोक ३४ ॥

To her who exists pervading this entire
World with the form of Thinking Mind,
Reverence to her, yea reverence to her !
Reverence to her, reverence, yea reverence !
34.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥

॥ मन्त्र ८१-श्लोक ३५ ॥

या सांप्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्त्तिभिः ॥

॥ मन्त्र ८२-श्लोक ३६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवताओं ने प्राचीन काल में अपने मनोरथ की प्राप्ति हेतु जिस भगवती की वन्दना की तथा देवताओं के राजा इन्द्र ने भी लम्बे समय तक जिसका अर्चन किया वह कल्याणकारिणी देवी ईश्वरी आपदाओं को दूर कर हमारा सदैव कल्याण करें ॥ श्लोक ३५ ॥

अपने बल के अहंकार से उन्नत दुष्ट दैत्यों द्वारा त्रस्त हम देवता लोग उन कल्याणस्वरूपा जगदम्बिका को प्रणाम करते हैं, जिनके स्मरण मात्र से भक्ति विनम्र पुरुष समस्त आपत्तियों से तत्काल छुटकारा पा जाते हैं ॥ श्लोक ३६ ॥

Praised by the gods afore-time because of eagerly-desired protection,
And waited upon by the lord of the gods many days,
May she, the goddess, the origin of bright-ness, accomplish for us
Bright things, yea good things, and ward off calamities ! 35.

And she, who is both reverenced as queen by us gods,
Who are tormented now by the arrogant Daityas,
And whom we called to mind as we bow our bodies in faith,
She this very moment destroys all our calamities ! 36.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र ८३ ॥

एवं स्तवादियुक्तानां देवानां तत्र पार्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥

॥ मन्त्र ८४-श्लोक ३७ ॥

साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।
शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥

॥ मन्त्र ८५-श्लोक ३८ ॥

स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥

॥ मन्त्र ८६-श्लोक ३९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—हे राजन् ! देवता लोग जिस समय यह स्तुति कर रहे थे उसी समय वहां भगवती पार्वती जाह्नवी नदी में स्नान करने आईं ।

॥ श्लोक ३७ ॥

देवताओं द्वारा की जा रही स्तुति को सुनकर सुन्दर भ्रकुटियों वाली भगवती पार्वती ने देवमण्डली से पूछा कि आप सब लोग किसकी स्तुति कर रहे हैं ? इस बीच, उन के शरीर कोश से प्रकट होकर देवी शिवा ने कहा ॥ श्लोक ३८ ॥

शुम्भ नामक दैत्य द्वारा अपमानित तथा निशुम्भ नामक दैत्य से युद्ध में पराजित ये सभी देवता एक होकर यहां मेरी ही स्तुति कर रहे हैं ।

॥ श्लोक ३९ ॥

The ṛishi said :

While the gods were thus engaged in offering hymns and other reverential acts, Pārvatī came there to bathe in the water of the Ganges, O prince. 37.

She, the beautiful-browed, said to those gods.—"whom do ye, lords, hymn here ?"

And springing forth from the treasure-house of her body the auspicious goddess spoke : 38.

"For me this hymn is uttered by the assembled gods, who have been set at nought by the Daitya Śumbha and routed in battle by Niśumbha. 39.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥
॥ मन्त्र ८७-श्लोक ४० ॥

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥
॥ मन्त्र ८८-श्लोक ४१ ॥

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥
॥ मन्त्र ८९-श्लोक ४२ ॥

ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥
॥ मन्त्र ९०-श्लोक ४३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवी पार्वती के शरीर कोश से अम्बिका की उत्पत्ति हुई थी, अतः वे कौशिकी के नाम से संसार में प्रसिद्ध हुईं ॥ श्लोक ४० ॥

देवी कौशिकी की उत्पत्ति के पश्चात् भगवती पार्वती का रंग श्याम वर्ण हो गया और वे हिमाचल पर निवास करने वाली कालिका देवी के नाम से प्रसिद्ध हुईं ॥ श्लोक ४१ ॥

तत्पश्चात् अम्बिका ने आश्चर्यचकित कर देने वाले सुन्दर स्वरूप को धारण कर लिया। अनन्तर शुम्भ-निशुम्भ के दूत चण्ड-मुण्ड वहां आ गए और उन्होंने अत्यन्त सुन्दरी के रूप में भगवती अम्बिका को देखा ॥ श्लोक ४२ ॥

वे दोनों (चण्ड तथा मुण्ड) शुम्भ के पास गए और उन्होंने कहा कि महाराज एक अत्यन्त सुन्दरी स्त्री अपने अद्भुत सौन्दर्य से हिमालय पर्वत को प्रकाशित कर रही है ॥ श्लोक ४३ ॥

Because Ambikā issued forth from the treasure-house of Pārvatī's body, she is therefore named in song as Kaushikī among all the worlds. 40.

Now after she had issued forth, the other also, even Pārvatī, became Kṛishṇā; she is celebrated as Kālikā; she fixed her abode on Mount Himāvat. 41.

Thereafter Caṇḍa, and Muṇḍa, the two servants of Śumbha and Niśumbha, saw Ambikā displaying her sublime and most captivating form. 42.

And both spake out unto Śumbha;—"What woman then, most surpassingly captivating, dwells here, illuminating Mount Himāvat, O great king? 43.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥
॥ मन्त्र ९१-श्लोक ४४ ॥

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्हति ॥
॥ मन्त्र ९२-श्लोक ४५ ॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे॥
॥ मन्त्र ९३-श्लोक ४६ ॥

ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥
॥ मन्त्र ९४-श्लोक ४७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऐसा अद्भुत सुन्दर स्वरूप किसी ने कहीं भी नहीं देखा है। हे दैत्यों के अधिपति ! आप यह ज्ञात करें कि वह सुन्दरी स्त्री कौन है तथा उस देवी को आप अपने यहाँ ले आवें ॥ श्लोक ४४ ॥

"Such sublime beauty was never in sooth seen by anyone anywhere; let it be ascertained if she is any goddess, and let her be taken possession of, O lord of the Asuras. 44.

वह सुन्दरी समस्त स्त्रियों में रत्न-रूपिणी है, उसके शरीर का प्रत्येक अवयव अत्यन्त सुन्दर तथा प्रभापूर्ण है। अतः वह अपने शरीरावयवों की प्रभा से सम्पूर्ण दिशाओं को प्रकाशित कर रही है। हे दैत्यराज ! अभी वह हिमालय पर्वत पर ही बैठी है, आप उसको देख सकते हैं।

॥ श्लोक ४५ ॥

"A gem among women, surpassingly beautiful in body, illuminating the regions of the sky with her lustre, there she is then, O lord of the Daityas; deign, sir, to look at her. 45.

प्रभो ! तीनों लोकों का समस्त ऐश्वर्य हाथी, घोड़े तथा मणि आदि सभी रत्न आपके पास असीमित मात्रा में हैं ॥ श्लोक ४६ ॥

"Moreover, whatever gems, precious stones, elephants, horses and other valuable things indeed exist in the three worlds, O lord, all these display their splendour at this present time in thy house. 46.

हाथियों में सर्वश्रेष्ठ ऐरावत हाथी जो इन्द्र का हाथी है तथा पारिजात नामक कल्पवृक्ष जो सभी कामनाओं को पूर्ण करता है और

Airāvata, gem among elephants, has been captured from Purandara; and this Pārijāta tree and also the horse Uccaihśravas. 47.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विमानं हंससंयुक्तमेतत्तिष्ठति तेंऽङ्गने ।
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥

॥ मन्त्र ९५-श्लोक ४८ ॥

निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किंजल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥

॥ मन्त्र ९६-श्लोक ४९ ॥

छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथायं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥

॥ मन्त्र ९७-श्लोक ५० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

उच्चैःश्रवा नामक घोड़ा, त्रिलोकी के ये सर्वश्रेष्ठ रत्न आपने इन्द्र से छीन ही लिए हैं।

॥ श्लोक ४७ ॥

इसी प्रकार यह सुन्दर विमान जो हंसों के द्वारा चलाया जाता है, वह भी अब आपके आंगन में शोभायमान हो रहा है। यह रत्नों से जटित अद्भुत विमान जो पहले ब्रह्मा के पास था वह भी अब आपके अधिकार में है ॥ श्लोक ४८ ॥

महापद्म नामक खजाना भी आपने कुवेर से छीन कर अपने अधिकार में ले लिया है तथा समुद्र ने आपके पराक्रम को देखकर किञ्जल्किनी नामक केसर से मण्डित माला आपको भेंट की है। जिसके कमल कभी नहीं कुम्हलाते ॥ श्लोक ४९ ॥

वरुण देवता का स्वर्ण वर्षा करने वाला छत्र तथा प्रजापति ब्रह्मा का श्रेष्ठ रथ भी अब आपके अधिकार में है ॥ श्लोक ५० ॥

"Here stands the heavenly chariot yoked with swans in thy court-yard; it has been brought here, the wonderful chariot composed of gems, which belonged to Brahmā. 48.

"Here is the Nidhi Mahāpadma, captured from the Lord of wealth. And the Ocean gave a garland made of filaments and of undying lotus flowers. 49.

"In thy house stands Varuṇa's umbrella, which streams with gold. And here is the choice chariot that belonged to Praja-pati formerly. 50.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥

॥ मन्त्र ९८-श्लोक ५१ ॥

निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥

॥ मन्त्र ९९-श्लोक ५२ ॥

एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥

॥ मन्त्र १००-श्लोक ५३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मृत्युदायिनी उत्क्रान्तिदा नामक शक्ति भी यम से आपने छीन ली है तथा वरुण देवता का पाश और समुद्र में उत्पन्न होने वाले विभिन्न रत्न आपके भ्राता निशुम्भ के अधिकार में है तथा अग्निदेव ने स्वेच्छा से ही अपने दो पवित्र वस्त्र आपको दे दिये हैं ॥ श्लोक ५१–५२ ॥

इस प्रकार हे दैत्याधिपति ! सभी उत्कृष्ट रत्नों के आप स्वामी हैं, अतः स्त्रियों में जो रत्न-रूप देवी है उसे भी आप अपने अधिकार में क्यों नहीं कर लेते ॥ श्लोक ५३ ॥

"Thou, O lord, hast carried off Death's power which is named Utkrānti-dā. The noose of the Ocean-king is in thy brother's possession. And Niśumbha has every kind of gem which is produced in the sea. Agni also gave thee two garments which are purified by fire. 51–52.

"Thus, O lord of the Daityas, all gems have been captured by thee; why dost thou not seize this auspicious lady, this gem of womankind ?" 53.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र १०१ ॥

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥

॥ मन्त्र १०२-श्लोक ५४ ॥

इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥

॥ मन्त्र १०३-श्लोक ५५ ॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥

॥ मन्त्र १०४-श्लोक ५६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—चण्ड और मुण्ड नामक दूतों की बातों को सुनकर शुम्भ ने महादैत्य सुग्रीव को दूत के रूप में अम्बिका के पास भेजा ॥ श्लोक ५४ ॥

निशुम्भ ने दूत से कहा कि तुम मेरे आदेशानुसार अमुक २ बातें उससे कहना और प्रयास करना कि वह प्रसन्न होकर शीघ्र ही यहाँ आ जावे।
॥ श्लोक ५५ ॥

शुम्भ द्वारा प्रेषित दूत हिमाचल के अत्यन्त सुन्दर प्रदेश में गया, जहाँ देवी उपस्थित थीं और वह मधुर वाणी में बोला ॥ श्लोक ५६ ॥

The ṛishi said :

Śumbha, on hearing this speech then from Caṇḍa and Muṇḍa sent the great Asura Sugrīva as messenger to the goddess, saying : 54.

"Go and address her thus and thus according to my words, and lightly conduct the matter so that she may come to me of her own good pleasure." 55.

He went to where the goddess sat on a very bright spot in the mountain and spoke gently with mellifluous voice. 56.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दूत उवाच

॥ मन्त्र १०५ ॥

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥

॥ मन्त्र १०६–श्लोक ५७ ॥

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह श्रृणुष्व तत् ॥

॥ मन्त्र १०७–श्लोक ५८ ॥

मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥

॥ मन्त्र १०८–श्लोक ५९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दूत ने कहा—देवि ! दैत्यों के राजा शुम्भ तीनों लोकों के स्वामी हैं। मैं उनके द्वारा ही भेजा गया दूत हूं और आपके पास आया हूं ॥ श्लोक ५७ ॥

दैत्यराज शुम्भ की आज्ञा का पालन सभी देवता करते हैं, कोई भी उनकी आज्ञाओं का उल्लंघन नही करता। क्योंकि सभी देवता शुम्भ से पराजित हो गये हैं। अतः अपने लिए तुम उनका सन्देश सुनो ॥ श्लोक ५८ ॥

तीनों लोकों का सम्पूर्ण स्वामित्व मेरे अधिकार में है। सभी देवता लोग मेरे वशीभूत होकर कार्य करते हैं तथा मैं ही अलग-अलग देवताओं के सम्पूर्ण यज्ञांश का उपभोग करता हूं ॥ श्लोक ५९ ॥

The messenger said:

O goddess : Sumbha, lord of the Daityas, is supreme lord, over the three worlds. A messenger am I, sent by him; to thy presence here I have come. 57.

Hearken to what he has said, whose command is never resisted among all beings of divine origin, and who has vanquished every foe of the Daityas. 58.

"Mine are all the three worlds; obedient to my authority are the gods, I eat every protion of the sacrifices separately. 59.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नानि हृत्वा देवेन्द्रवाहनम् ॥

॥ मन्त्र १०९-श्लोक ६० ॥

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥

॥ मन्त्र ११०-श्लोक ६१ ॥

यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥

॥ मन्त्र १११-श्लोक ६२ ॥

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥

॥ मन्त्र ११२-श्लोक ६३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तीनों लोकों के सम्पूर्ण श्रेष्ठ रत्न मेरे अधिकार में हैं। देवराज इन्द्र का वाहन ऐरावत जो हाथियों में सर्वश्रेष्ठ रत्न है, उसे मैंने ले लिया है ॥ श्लोक ६० ॥

क्षीर सागर का मन्थन करने के बाद उच्चैःश्रवा नामक जो सर्वश्रेष्ठ अश्वरत्न प्रकट हुआ था उसे भी देवताओं ने नतमस्तक होकर मुझे समर्पित कर दिया है ॥ श्लोक ६१ ॥

हे सुन्दरि ! इसके अतिरिक्त त्रिलोकी में अन्यान्य जो भी रत्नभूत द्रव्य देवताओं, गन्धर्वों तथा नागों के पास थे, वे सब अब मेरे ही पास हैं।
॥ श्लोक ६२ ॥

देवि ! आप संसार की स्त्रियों में सर्वश्रेष्ठ रत्न हैं, हम ऐसा मानते हैं, अतः तुम हमारे पास आ जाओ क्योंकि रत्नों के एकमात्र उपभोक्ता हमीं लोग हैं ॥ श्लोक ६३ ॥

"The choicest gems in the three worlds; are altogether under my power; and so are the finest elephants and the chariot of the lord of the gods, since I have captured them. 60.

"That gem among horses, named Uccaih-śravasa, which came forth at the churning of the sea of milk, was presented to me by the immortals who prostrated themselves before me. 61.

"And whatever other created things in the shape of gems existed among the gods, Gandharvas and Nāgas, they were presented even to me, O brilliant lady. 62.

"I esteem thee O goddess, to be the gem of womankind in the world; do thou, who art such, approach unto me, since I am an enjoyer of gems. 63.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥

॥ मन्त्र ११३-श्लोक६४ ॥

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥

॥ मन्त्र ११४-श्लोक ६५ ॥

ऋषिरुवाच

॥ मन्त्र ११५ ॥

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥

॥ मन्त्र ११६-श्लोक ६६ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

चंचल नेत्रों वाली सुन्दरि ! मेरे या मेरे पराक्रमी भ्राता निशुम्भ के आश्रय में आ जाओ, क्योंकि तुम रत्नरूपा हो ॥ श्लोक ६४ ॥

मेरे आश्रय में आ जाने पर तुम्हें अतुलनीय ऐश्वर्य की प्राप्ति होगी, यह विचार कर मेरे आश्रय में आ जाओ ॥ श्लोक ६५ ॥

ऋषि ने कहा—दूत के इस प्रकार कहने पर, भगवती दुर्गा जो संसार को धारण करने वाली और सारी सृष्टि की आधार हैं, गम्भीरता से मन ही मन मुस्करायीं और बोलीं ॥ श्लोक ६६ ॥

"Either to me, or to my younger brother Niśumbha of wide-reaching prowess, approach thou, O lady of quick side-glances, since thou art in truth a gem. 64.

"Supreme dominion beyond compare thou shalt gain by wedding me. Understand and consider this, and come unto wedlock with me". 65.

The ṛishi said :

Thus accosted the goddess, smiling deeply within herself, she, Durgā the adorable good, and who supports this world, sang this reply then. 66.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देव्युवाच

॥ मन्त्र ११७ ॥

सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥

॥ मन्त्र ११८–श्लोक ६७ ॥

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥

॥ मन्त्र ११९–श्लोक ६८ ॥

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥

॥ मन्त्र १२०–श्लोक ६९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवी ने कहा—तुम ने जो कुछ कहा है, वह सब सत्य है, झूंठ बिल्कुल नहीं है। शुम्भ तीनों लोकों का अधिपति है तथा निशुम्भ भी उसी के समान बलशाली है ॥ श्लोक ६७ ॥

परन्तु मैं अपनी प्रतिज्ञा को असत्य कैसे होने दूं ? अपनी अल्प बुद्धि के कारण पूर्व में मैंने जो प्रतिज्ञा की थी वह सुनो ॥ श्लोक ६८ ॥

युद्ध में जो कोई भी मुझे पराजित कर मेरा घमण्ड नष्ट कर देगा तथा लोक में जो मेरे ही समान बलशाली होगा वही मेरा पति होगा।

॥ श्लोक ६९ ॥

The goddess said :

Truly hast thou spoken; nought hast thou uttered falsely herein. Sovereign of the three worlds is Sumbha, and like unto him is Niśumbha also. 67.

But how can that which has been promised concerning this myself be fulfilled falsely ? Hearken, what vow I made formerly by reason of my small understanding at that time. 68.

'He who vanquishes me in fight, who forces my pride from me, and who is my match in strength in the world, he shall be my husband.' 69.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥

॥ मन्त्र १२१-श्लोक ७० ॥

दूतउवाच

॥ मन्त्र १२२ ॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमाँस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥

॥ मन्त्र १२३-श्लोक ७१ ॥

अन्येषामपि दैत्यानां सर्वे दैवा न वै युधि ।
तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥

॥ मन्त्र १२४-श्लोक ७२ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अतः शुम्भ या निशुम्भ दोनों में से कोई भी यहाँ आवे तथा युद्ध में मुझे पराजित कर शीघ्र ही मेरा पाणिग्रहण करे, फिर इसमें विलम्ब नहीं ॥ श्लोक ७० ॥

दूत ने कहा— देवि, अभिमान के कारण तुम इस प्रकार की बातें मेरे सामने मत करो। त्रिलोकी में ऐसा कौन पुरुष होगा जो शुम्भ-निशुम्भ के सामने टिक सके ॥ श्लोक ७१ ॥

अन्य असुरों के सामने जब सब देवता मिल कर भी युद्ध में नहीं टिक सके तब तुम अकेली स्त्री होकर कैसे मुकाबला कर पावोगी ॥ श्लोक ७२ ॥

Let Sumbha come here then, or Niśumbha the great Asura; let him vanquish me–what need of delay here ? and let him lightly take my hand in marriage ! 70.

The messenger said :

Proud art thou; Talk not so before me, O goddess; ! What male in the three worlds may stand front to front with Śumbha and Niśumbha ? 71.

All the gods verily stand not face to face with even the other Daityas in battle, O goddess; how much less canst thou so stand, a woman single–handed ! 72.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥

॥ मन्त्र १२५-श्लोक ७३ ॥

सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥

॥ मन्त्र १२६-श्लोक ७४ ॥

देव्युवाच

॥ मन्त्र १२७ ॥

एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥

॥ मन्त्र १२८—श्लोक ७५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इन्द्र आदि समस्त देवता लोग संयुक्त रूप से भी जिसका मुकाबला नहीं कर सके, उस शुम्भ का मुकाबला तुम स्त्री होकर कैसे कर पाओगी ?

॥ श्लोक ७३ ॥

अतः तुम मेरे कहने से ही, शुम्भ-निशुम्भ के पास चलो और अपनी मर्यादा की रक्षा करो। अन्यथा जब वे तुम्हें केश पकड़ कर बलात् यहाँ से ले जावेंगे तो तुम अपमानित होकर और अपना गौरव खोकर जाओगी ॥ श्लोक ७४ ॥

देवी ने कहा—तुम्हारा कथन उपयुक्त है। शुम्भ तथा निशुम्भ दोनों ही महाबली तथा पराक्रमी हैं। किन्तु मैं विवश हूं क्योंकि बिना सोचे-विचारे ही मैंने पूर्व में ऐसी प्रतिज्ञा कर ली है ॥ श्लोक ७५ ॥

With Śumbha and those other Daityas, against whom Indra and all the other gods stood not in battle, how shalt thou, a woman venture face to face ? 73.

Do thou, being such, to whom I have in sooth delivered my message, go near unto Śumbha and Niśumbha ; let it not be that thou shalt go with thy dignity shattered in that thou wilt be dragged thither by thy hair ! 74.

The goddess said :

So strong as this is Śumbha ; and so exceedingly heroic is Niśumbha ! What can I do, since there stands my ill-considered promise of long ago ? 75.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥

॥ मन्त्र १२६-श्लोक ७६ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या दूतसंवादो नाम पञ्चमोऽध्यायः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अब तुम यहां से जाओ तथा मैंने तुमसे जो-जो बातें कहीं हैं उनको दैत्यराज शुम्भ से आदरपूर्वक कहना इसके बाद उन्हें जो उचित लगेगा करेंगे।

॥ श्लोक ७६ ॥

इति श्रीमार्कण्डेय-पुराण में सावर्णि से सम्बद्ध मन्वन्तर कथा के अन्तर्गत देवी माहात्म्य में देवी दूत संवाद नामक पञ्चम अध्याय सम्पूर्ण हुआ।

Go thou thyself; make known respectfully to the lord of the Asuras all this that I have said to thee, and let him do whatever is fitting. 76.

The end of goddess' conversation with the Asura's messenger.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

षष्ठोऽध्यायः

ऋषिरुवाच

॥ मन्त्र १ ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥

॥ मन्त्र २-श्लोक १ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

षष्ठ अध्याय

धूम्रलोचन वध

शुम्भ ने अपने सेनापति धूम्रलोचन और सेना को, देवी को बन्दी बनाने के लिए भेजा और देवी ने उन्हें नष्ट कर दिया। तब उसने चण्ड और मुण्ड को दूसरी सेना लेकर भेजा।

ऋषि ने कहा—देवी की यह बात सुन कर वह दूत क्रुद्ध हो उठा और उसने दैत्यराज शुम्भ के पास जाकर विस्तार से सारी बात बतलाई।

॥ श्लोक १ ॥

THE DEVĪ MĀHĀTMYA

The slaying of Śumbha and Niśumbha's general Dhūmra-loçana.

Śumbha *despatched his general* Dhūmra-loçana *and an army to capture the goddess and she destroyed them. He then despatched* Caṇḍa *and* Muṇḍa *with another army.*

The ṛishi said :

The messenger, on hearing this speech from the goddess, was filled with indignation, and approaching related it fully to the Daitya king. 1.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥

॥ मन्त्र ३-श्लोक २ ॥

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥

॥ मन्त्र ४-श्लोक ३ ॥

तत्परित्राणदः कश्चिद् यदि वोत्तिष्ठते परः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥

॥ मन्त्र ५-श्लोक ४ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शुम्भ ने दूत के उस कथन को सुना और क्रुद्ध होकर दैत्यों के सेनापति धूम्रलोचन से कहा।

॥ श्लोक २ ॥

हे धूम्रलोचन! तुम शीघ्र ही अपनी सेना लेकर जाओ और केश पकड़कर घसीटने से विह्वल उस दुष्टा को बलपूर्वक यहां ले आओ ॥ श्लोक ३ ॥

उसको बचाने वाला यदि कोई सामने आये तो उसे अवश्य ही मार डालना वह देव, यक्ष या गन्धर्व ही क्यों न हो ॥ श्लोक ४ ॥

The Asura monarch then, after hearing that report from his messenger, was wroth and commanded Dhūmra-loçana, a chieftain of the Daityas. 2.

"Ho ! Dhūmra-loçana, haste thee together with thy army; fetch by force that shrew, who will be unnerved when dragged along by her hair. 3.

"Or if any man besides stands up to offer her deliverance, let him be slain, be he an Immortal, a Yaksha or a Gandharva forsooth." 4.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र ६ ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥

॥ मन्त्र ७-श्लोक ५ ॥

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥

॥ मन्त्र ८-श्लोक ६ ॥

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥

॥ मन्त्र ९-श्लोक ७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—इसके बाद शुम्भ की आज्ञा पाकर धूम्रलोचन नामक वह दैत्य साठ हजार राक्षसों की सेना के साथ शीघ्र ही वहां से चल पड़ा।

॥ श्लोक ५ ॥

उसने हिमाचल पर निवास करने वाली देवी को वहाँ देखा और बड़े उच्च स्वर से बोला—"तुम शुम्भ-निशुम्भ के पास चली जाओ।

॥ श्लोक ६ ॥

"यदि तुम प्रसन्नता से मेरे मालिक के पास नहीं जावोगी तो मैं बलपूर्वक केशों को पकड़कर तुमको घसीटता हुआ ले चलूंगा" ॥ श्लोक ७ ॥

The ṛishi said :

Thereupon at his command the Daitya Dhūmra-loçana went forthwith quickly, accompanied by sixty thousand Asuras. 5.

On seeing the goddess stationed on the snowy mountain, he cried aloud to her there-"Come forward to the presence of Śumbha and Niśumbha. 6.

"If thou wilt not, lady, approach my lord with affection now, I will here take thee by force, who wilt be unnerved since thou shalt be dragged along by the hair !" 7.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देव्युवाच

॥ मन्त्र १० ॥

दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥

॥ मन्त्र ११–श्लोक ८ ॥

ऋषिरुवाच

॥ मन्त्र १२ ॥

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हूंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥

॥ मन्त्र १३—श्लोक ९ ॥

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवी बोली—दैत्यों के स्वामी ने तुम्हें भेजा है, तुम स्वयं बलशाली हो तथा तुम्हारे साथ सेना भी है, ऐसी स्थिति में यदि तुम मुझे जबरदस्ती ले चलोगे तो मैं तुम्हारा क्या कर सकती हूं।

॥ श्लोक ८ ॥

ऋषि ने कहा—देवी के ऐसा कहने पर धूम्र-लोचन उनकी ओर दौड़ा, तब अम्बिका ने हुंकार शब्द के उच्चारण से ही उसे भस्म कर दिया।

॥ श्लोक ९ ॥

The goddess said :

Sent by the king of the Daityas, mighty thyself, and accompanied by an army, thou dost thus take me by force—then what can I do unto thee ? 8.

The ṛishi said :

At this reply the Asura Dhūmra-loçana rushed towards her, then Ambikā with a mere roar reduced him to ashes. 9.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिकाम् ।
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥

॥ मन्त्र १४—श्लोक १० ॥

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥

॥ मन्त्र १५-श्लोक ११ ॥

कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ।
आक्रम्य चाधरेणान्यान्संजघान महासुरान् ॥

॥ मन्त्र १६—श्लोक १२ ॥

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥

॥ मन्त्र १७—श्लोक १३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इसके बाद क्रोध से परिपूर्ण राक्षसों की विशाल सेना और अम्बिका ने परस्पर तीक्ष्ण बाणों, शक्तियों, फरसों आदि की वर्षा करना प्रारम्भ कर दिया ॥ श्लोक १० ॥

And the great army of Asuras enraged poured on Ambikā a shower both of sharp arrows and of javelins and axes. 10.

भगवती जगदम्बा का वाहन सिंह क्रोध से उद्दीप्त होकर भयंकर गर्जना करते हुए अपनी ग्रीवा के केशों को आन्दोलित करता हुआ राक्षसों की सेना पर कूद पड़ा ॥ श्लोक ११ ॥

The lion that carried the goddess, shaking his mane in anger and uttering a most terrific roar, fell on the army of Asuras. 11.

देवी वाहन सिंह ने कुछ असुरों को अपने अगले पंजों के प्रहार से और अन्य दैत्यों को मुख से, कितनों को अपनी दाढ़ों से आक्रमण करके मार डाला ॥ श्लोक १२ ॥

He slaughtered some Asuras with a blow from his fore-paw, and others with his mouth, and others very great Asuras, by striking them with his hind foot. 12.

देवी वाहन सिंह ने अनेक असुरों के उदर को अपने नखों से फाड़ डाला और अनेकों के मस्तकों को अपने हाथों के प्रहार द्वारा धड़ से अलग कर दिया । ॥ श्लोक १३ ॥

The lion with his claws tore out the entrails of some, and struck their heads off with a cuff-like blow. 13.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥

॥ मन्त्र १८—श्लोक १४ ॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥

॥ मन्त्र १९-श्लोक १५ ॥

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥

॥ मन्त्र २०-श्लोक १६ ॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥

॥ मन्त्र २१-श्लोक १७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अनेकों के हाथ और सिर काट दिए और अपनी ग्रीवा के केशों को हिलाते हुए अन्य दैत्यों के उदरों को फाड़कर उनका रक्त पान कर लिया। महाबलिष्ठ एवं अत्यन्त क्रुद्ध देवी वाहन सिंह ने पल भर में राक्षसों की सम्पूर्ण सेना को नष्ट कर दिया ॥ श्लोक १४–१५ ॥

And he severed arms and heads from others, and shaking his mane drank the blood that flowed from the entrails of others. In a moment all that army was brought to destruction by the high-spirited lion, who bore the goddess and who was enraged exceedingly. 14–15.

शुम्भ ने जब यह सुना कि देवी ने धूम्रलोचन को मार दिया और उनके वाहन सिंह ने सम्पूर्ण सेना का विनाश कर दिया, तो वह क्रुद्ध हुआ और उसके ओष्ठ फड़फड़ाने लगे ॥ श्लोक १६–१७ ॥

When he heard that that Asura Dhūmra loçana was slain by the goddess, and all his army besides was destroyed by the goddess' lion, Śumbha, the lord of the Datiyas, fell into a rage and his lip quivered greatly, and he commanded the two mighty Asuras Çaṇḍa and Muṇḍa. 16–17.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

1301

हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ ।
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥

॥ मन्त्र २२-श्लोक १८ ॥

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥

॥ मन्त्र २३-श्लोक १९ ॥

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥

॥ मन्त्र २४-श्लोक २० ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भनिशुम्भसेनानी धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शुम्भ ने चण्ड और मुण्ड नामक महाराक्षसों को आज्ञा दी कि हे चण्ड ! हे मुण्ड ! तुम दोनों बहुत बड़ी सेना लेकर जाओ और उस देवी को बाल पकड़ कर घसीट कर या बाँध कर शीघ्र यहाँ ले आओ । यदि उसको यहाँ लाने में सन्देह हो तो युद्ध क्षेत्र में समस्त अस्त्र-शस्त्रों और सारी असुर सेना के द्वारा प्रहार करके उसे मार डालो ।

॥ श्लोक १८-१९ ॥

उस दुष्टा अम्बिका तथा सिंह को मार कर और बाँध कर उनको अपने साथ लेकर जल्दी लौट आओ ॥ श्लोक २० ॥

मार्कण्डेय पुराण में सावर्णि से सम्बद्ध मन्वन्तर कथा के अन्तर्गत देवी माहात्म्य में धूम्रलोचन वध नामक षष्ठ अध्याय सम्पूर्ण हुआ ।

"Ho, Caṇḍa ! Ho, Muṇḍa ! take with you a multitude of troops and go there; and going there bring her here speedily, dragging her by her hair or binding her; if ye have a doubt of that, then let her be slain outright in fight by all the Asuras brandishing all their weapons. 18-19.

"When that shrew is slain and her lion striken down, seize her, Ambikā, bind her and bring her quickly !" 20.

The end of the slaying of Śumbha and Niśumbha's general Dhūmra-loçana.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सप्तमोऽध्यायः

ऋषिरुवाच

॥ मन्त्र १ ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥

॥ मन्त्र २-श्लोक १ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सप्तम अध्याय

चण्ड और मुण्ड का बध

देवी काली ने दूसरी असुर सेना का भी संहार कर दिया और सेनापति चण्ड और मुण्ड को मार दिया। चण्डिका ने काली को पुरस्कार स्वरूप चामुण्डा नाम प्रदान किया।

ऋषि ने कहा—शुम्भ की आज्ञा से चण्ड मुण्ड की अगुवाई में असुर लोगों ने चतुरंगिणी सेना सहित आयुधों से सुसज्जित होकर युद्ध के लिए प्रस्थान किया ॥ श्लोक १ ॥

THE DEVĪ MĀHĀTMYA

The slaying of Caṇḍa and Muṇḍa.

The goddess Kālī *destroyed the second Asura army and also the generals* Caṇḍa *and* Muṇḍa—Caṇḍikā *gave* Kālī *as a reward the name* Cāmuṇḍā.

The ṛishi said :

Then at his command the Daityas, led by Caṇḍa and Muṇḍa, and arrayed in the four-fold order of an army, marched with weapons uplifted. 1.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥

॥ मन्त्र ३-श्लोक २ ॥

ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥

॥ मन्त्र ४-श्लोक ३ ॥

ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥

॥ मन्त्र ५-श्लोक ४ ॥

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद् द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥

॥ मन्त्र ६-श्लोक ५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

असुरों ने पर्वतराज हिमालय के स्वर्णमय शिखर पर, सिंह के ऊपर बैठी हुई तथा मन्द-मन्द मुस्कराती हुई देवी को देखा ॥ श्लोक २ ॥

असुर लोग देवी को पकड़ने का प्रयास करने लगे। किसी ने धनुष खींच लिया और किसी ने तलवार तथा कुछ असुर देवी के समीप जा पहुँचे। ॥ श्लोक ३ ॥

अनन्तर अम्बिका को उन असुर शत्रुओं पर अत्यन्त क्रोध आया और क्रोध से उनका मुखमण्डल काले रंग का हो गया ॥ श्लोक ४ ॥

उनकी भौंहें तन गईं और हाथ में खड्ग तथा पाश लिए हुए ललाट से विकराल मुखवाली काली तुरन्त अवतरित हुईं ॥ श्लोक ५ ॥

Soon they saw the goddess slightly smiling, seated upon the lion, on a huge golden peak of the majestic mountain. 2.

On seeing her some of them made a strenuous effort to capture her, and others approached her holding their bows bent and their swords drawn. 3.

Thereat Ambikā uttered her wrath aloud against those foes, and her countenance then grew dark as ink in her wrath. 4.

Out from the surface of her forehead, which was rugged with frowns, issued suddenly Kālī of the terrible countenance. 5.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥
॥ मन्त्र ७—श्लोक ६ ॥

अतिविस्तारवदना जिह्वाललनभीषणा ।
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥
॥ मन्त्र ८—श्लोक ७ ॥

सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥
॥ मन्त्र ९—श्लोक ८ ॥

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥
॥ मन्त्र १०—श्लोक ९ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वे विचित्र खट्वांग (नर पन्जरी नामक आयुध विशेष) लिए हुए, नर मुण्डों की माला तथा चीते के चर्म का वस्त्र (व्याघ्र चर्म) धारण किये हुए थीं तथा अत्यन्त भयंकर लगने वाली और शुष्क देहमांस वाले अस्थिपंजर को धारण किये थीं। इसलिए उनकी आकृति अत्यन्त भयंकर लग रही थी ॥ श्लोक ६ ॥

Armed with a sword and noose, bearing a many-coloured skull-topped staff, decorated with a garland of skulls, clad in a tiger's skin, very appalling because of her emaciated flesh. 6.

उनकी मुखाकृति विशाल थी और लपलपाती हुई जिह्वा से वे अत्यन्त भयंकर दिखाई दे रही थीं। उनके नेत्र भीतर धंसे हुए और रक्त वर्ण के हो रहे थे ॥ श्लोक ७ ॥

Exceedingly wide of mouth lolling out her tongue terribly, having deep-sunk reddish eyes, and filling the regions of the sky with her roars. 7.

अम्बिका अपने भयंकर नाद से समस्त दिशाओं को गुंजित कर रही थीं तथा विशालकाय असुरों का संहार करती हुई दैत्य सेना पर बड़े वेग से आक्रमण कर दैत्यों को उदरस्थ करने लगीं।
॥ श्लोक ८ ॥

She fell upon the great Asuras impetuously, dealing slaughter among the host, and devoured that army of the gods' foes there. 8.

पृष्ठ भाग के रक्षकों, अग्रिम पंक्ति के अंकुश लिए हुए योद्धाओं तथा घण्टों समेत हाथियों के समूह को एक हाथ से पकड़ कर उन्होंने मुंह में प्रविष्ट कर लिया ॥ श्लोक ९ ॥

Taking up the elephants with one hand she flung them into her mouth, together with their rearmen and drivers and their warrior-riders and bells. 9.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्चर्वयत्यतिभैरवम् ॥

॥ मन्त्र ११-श्लोक १० ॥

एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥

॥ मन्त्र १२-श्लोक ११ ॥

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥

॥ मन्त्र १३-श्लोक १२ ॥

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्याँश्चाताडयत्तथा ॥

॥ मन्त्र १४-श्लोक १३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

देवी ने सारथियों एवं अश्वों सहित रथों तथा उसके सिपाहियों को मुँह में डाल कर भयंकर रूप से चबा लिया ॥ श्लोक १० ॥

किसी असुर के केश खींच लिये, किसी की गर्दन मरोड़ दी तथा किसी को पैर से दबा कर अथवा वक्षस्थल की टक्कर देकर प्राणान्त कर दिया ॥ श्लोक ११ ॥

दैत्यों द्वारा छोड़े गए अस्त्र-शस्त्रों को देवी ने अपने मुख से पकड़ लिया और क्रोध से अपने दांतों से पीस दिया ॥ श्लोक १२ ॥

बलिष्ठ तथा दुरात्मा दैत्यों की सम्पूर्ण सेना का मर्दन कर डाला और भक्षण कर लिया, अन्य कुछ असुरों को मार कर खदेड़ दिया ।
॥ श्लोक १३ ॥

Flinging likewise warrior with his horses, and chariot with its driver into her mouth, she ground them most frightfully with her teeth. 10.

She seized one by the hair, and another by the neck; and she kicked another with her foot, and crushed another against her breast. 11.

And she seized with her mouth the weapons and the great arms which those Asuras abandoned, and crunched them up with her teeth in her fury. 12.

She crushed all that host of mighty and high-spirited Asuras; and devoured some and battered orhers. 13.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

असिना निहताः केचित् केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥

॥ मन्त्र १५-श्लोक १४ ॥

क्षणेन तद्बलं सर्वमसुराणां निपातिम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥

॥ मन्त्र १६-श्लोक १५ ॥

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥

॥ मन्त्र १७-श्लोक १६ ॥

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ।

॥ मन्त्र १८-श्लोक १७ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भगवती ने कुछ असुरों को खड्ग से मार दिया और कुछ को खट्वाङ्ग से आहत किया तथा कुछ को नुकीले दांतों से मार डाला।

॥ श्लोक १४ ॥

Some were slain with her sword, some were struck with her skull-topped staff, and other Asuras met their death being wounded with the edge of her teeth. 14.

इस प्रकार क्षण भर में देवी ने दैत्यों की समस्त सेना को युद्ध में मार दिया। इस दृश्य को देखकर चण्ड अत्यन्त भयंकर दिखाई पड़ने वाली काली की ओर दौड़ पड़ा ॥ श्लोक १५ ॥

Seeing all that host of Asuras laid low in a moment, Caṇḍa rushed against her, Kālī, who was exceedingly appalling. 15.

महाराक्षस मुण्ड ने अत्यन्त भयंकर बाणों की वर्षा कर तथा हजारों बार चक्र चलाकर भयानक नेत्र वाली देवी को ढक दिया।

॥ श्लोक १६ ॥

Muṇḍa the great Asura covered her, the terrible-eyed goddess, with very terrible showers af arrows and with discuses hurled in thousands. 16.

देवी के मुख में प्रवेश करते हुए वे असंख्य चक्र ऐसे प्रतीत होते थे मानों एक साथ बहुत से सूर्य-मण्डल बादलों के भीतर जा रहे हों।

॥ श्लोक १७ ॥

Those discuses seemed to be penetrating her countenance in multitudes, like as very many solar orbs might penetrate the body of a thunder-cloud. 17.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततो जहासातिरुषा भीमं भैरवनादिनी ।
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥

॥ मन्त्र १९–श्लोक १८ ॥

उत्थाय च महासिं हंदेवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥

॥ मन्त्र २०—श्लोक १९ ॥

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥

॥ मन्त्र २१—श्लोक २० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इसके बाद भयानक नाद करने वाली काली ने, जिसके विकराल मुख में डरावने दांतों की कांति आभासित हो रही थी, अत्यन्त क्रोधपूर्ण मुद्रा में भयंकर अट्टहास किया ॥ श्लोक १८ ॥

देवी विशाल खड्ग हाथ में लेकर क्रोध सूचक 'हं' शब्द का उच्चारण करती हुई चण्ड की ओर दौड़ीं और उसके केशों को पकड़कर खड्ग से उसका सिर काट दिया ॥ श्लोक १९ ॥

चण्ड को मृत्युदशा में देखकर मुण्ड भी देवी की ओर दौड़ा। देवी ने क्रोधित होकर उसको भी खड्ग से मार कर पृथ्वी पर गिरा दिया ।

॥ श्लोक २० ॥

Thereat Kālī, who was roaring frightfully, laughed terribly with excessive fury, showing the gleam of her unsightly teeth within her dreadful mouth. 18.

And the goddess, mounting upon her great lion, rushed at Caṇḍa, and seizing him by his hair struck off his head with her sword. 19.

And Muṇḍa also rushed at her when he saw Caṇḍa laid low; him also she felled to the ground, stricken with her scymitar in her fury. 20.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततो जहासातिरुषा भीमं भैरवनादिनी ।
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥

॥ मन्त्र १९–श्लोक १८ ॥

उत्थाय च महासिं हर्देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥

॥ मन्त्र २०—श्लोक १९ ॥

अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥

॥ मन्त्र २१—श्लोक २० ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

इसके बाद भयानक नाद करने वाली काली ने, जिसके विकराल मुख में डरावने दांतों की कांति आभासित हो रही थी, अत्यन्त क्रोधपूर्ण मुद्रा में भयंकर अट्टहास किया ॥ श्लोक १८ ॥

देवी विशाल खड्ग हाथ में लेकर क्रोध सूचक 'हं' शब्द का उच्चारण करती हुई चण्ड की ओर दौड़ीं और उसके केशों को पकड़कर खड्ग से उसका सिर काट दिया ॥ श्लोक १९ ॥

चण्ड को मृत्युदशा में देखकर मुण्ड भी देवी की ओर दौड़ा। देवी ने क्रोधित होकर उसको भी खड्ग से मार कर पृथ्वी पर गिरा दिया।

॥ श्लोक २० ॥

Thereat Kālī, who was roaring frightfully, laughed terribly with excessive fury, showing the gleam of her unsightly teeth within her dreadful mouth. 18.

And the goddess, mounting upon her great lion, rushed at Caṇḍa, and seizing him by his hair struck off his head with her sword. 19.

And Muṇḍa also rushed at her when he saw Caṇḍa laid low; him also she felled to the ground, stricken with her scymitar in her fury. 20.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥

॥ मन्त्र २२-श्लोक २१ ॥

शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥

॥ मन्त्र २३-श्लोक २२ ॥

मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥

॥ मन्त्र २४-श्लोक २३ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

महाबलशाली चण्ड और मुण्ड को मरा हुआ देखकर मृत्यु से बची हुई बाकी सेना भय से आतुर होकर चारों दिशाओं में भाग गयी ॥ श्लोक २१ ॥

इसके बाद काली चण्ड और मुण्ड का सिर अपने हाथ में लेकर चण्डिका के पास पहुँचीं तथा बड़े जोर से अट्टहास करते हुए कहा ॥ श्लोक २२ ॥

मैंने चण्ड और मुण्ड नामक इन दो महापशुओं की तुमको भेंट दी है, अब तुम स्वयं युद्ध के यज्ञ में शुम्भ और निशुम्भ का वध करोगी ॥ श्लोक २३ ॥

Then the army, so much as escaped unslain, seeing Caṇḍa laid low and most valiant Muṇḍa also, seized with panic fled in all directions. 21.

And Kālī, holding Çaṇḍa's head and Muṇḍa also, approached Çaṇḍikā and said her voice mingled with passionate loud laughter: 22.

"Here I have brought thee Çaṇḍa and Muṇḍa, two great beasts; thou thyelf shalt slay Śumbha and Niśumbha in the battle-saorifice." 23.

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषिरुवाच

॥ मन्त्र २५ ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥

॥ मन्त्र २६-श्लोक २४ ॥

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥

॥ मन्त्र २७-श्लोक २५ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
चण्डमुण्डवधोनाम सप्तमोऽध्याय ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि ने कहा—इसके बाद चण्ड और मुण्ड नामक, वहाँ लाये गए महान् राक्षसों को देखकर कल्याणी चण्डिका ने मधुर वाणी में काली से कहा। ॥ श्लोक २४ ॥

क्योंकि तुम स्वयं चण्ड और मुण्ड को लेकर मेरे पास उपस्थित हुई हो, अतः विश्व में चामुण्डा के नाम से तुम्हारी प्रसिद्धि होगी ॥ श्लोक २५ ॥

मार्कण्डेयपुराण में सावर्णि से सम्बद्ध मन्वन्तर-कथा के अन्तर्गत देवी-माहात्म्य में चण्डमुण्ड-वध नामक सप्तम अध्याय सम्पूर्ण हुआ।

The ṛishi said :

Thereon, seeing those two great Asuras Caṇḍa and Muṇḍa brought to her, auspicious Caṇḍikā spoke to Kālī this witty speech : 24.

"Because thou hast seized both Caṇḍa and Muṇḍa and brought them, thou, O goddess, shalt therefore be famed in the world by the name Cāmuṇḍā !" 25.

The end of the slaying of Caṇḍa and Muṇḍa.

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अष्टमोऽध्यायः

ऋषिरुवाच

॥ मन्त्र १ ॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥

॥ मन्त्र २–श्लोक १ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

CSU-Jaipur Campus Collection

अष्टम अध्याय

रक्तबीज का वध

शुम्भ ने अपनी समस्त सेनाओं को चण्डिका के विरुद्ध भेज दिया। देवी की सहायता के लिये सभी देवताओं की शक्तियों ने देह धारण की। चण्डिका ने शिव को शुम्भ के पास शान्ति की शर्तों के लिए भेजा। किन्तु असुर सेनाओं ने उन पर आक्रमण कर दिया और युद्ध आरम्भ हो गया। चण्डिका का महान दैत्य रक्तबीज के साथ युद्ध हुआ, जिसमें वह मारा गया।

ऋषि ने कहा—चण्ड और मुण्ड नामक असुरों के मार दिये जाने तथा अधिकांश सेना का विनाश हो जाने पर असुरों के स्वामी, प्रतापी शुम्भ का

THE DEVĪ MĀHĀTMYA

The slaying of Rakta-vīja.

Śumbha sent forth all his armies against Caṇḍikā— *To help her the Energies* (Śaktis) *of the gods took bodily shape*— Caṇḍika *despatched* Śiva *to offer terms of peace to* Śumbha, *but the Asura hosts attacked her and the battle began*— Caṇḍikā's *fight with the great Asura Rakta-vīja is described—He was killed.*

The ṛishi said

After both the Daitya Caṇḍa was slain and Muṇḍa was laid low, and many soldiers were destroyed, the lord of the Asuras,

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥

॥ मन्त्र ३-श्लोक २ ॥

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥

॥ मन्त्र ४-श्लोक ३ ॥

कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥

॥ मन्त्र ५-श्लोक ४ ॥

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥

॥ मन्त्र ६—श्लोक ५ ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हृदय क्रोध से भर उठा तथा उसने असुरों की सारी सेना को युद्ध में उतरने का आदेश दे दिया ।
॥ श्लोक १-२ ॥

न्निःक्षिप्य। ॐ सोममण्डलाय षोडशकलात्मने नमः इति जले सोममण्डलं विभाव्य संपूज्य सूर्यमण्डलादङ्कुशमुद्रया ॐ ब्रह्माण्डोदरतीर्थानीति[1] मन्त्रेण तीर्थान्यावाह्य धेनुमुद्रया ॐ गङ्गे च यमुने चैव इति मन्त्रेण तज्जलममृतीकृत्य हुमित्यवगुण्ठ्य चक्रमुद्रां प्रदर्श्य अस्त्रमुद्रया संरक्ष्य मत्स्यमुद्रया मूलेनाष्टधाभिमन्त्र्य पुनरस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य मूलमुच्चरंस्तेनोदकेनात्मानं पूजाद्रव्यं चाभिषिच्य आत्मानं गन्धादिभिरलङ्कृत्य देवताभेदेनात्मानं ध्यायन्पीठपूजामारभेत। पूर्वलिखितं यन्त्रं क्वचिन्मनोहरे पीठे संस्थाप्य अर्घोदकेनाभ्युक्ष्य। षट्कोणे ॐ ॐकारपीठाय नमः। अष्टदले ॐ पूं पूर्णगिरिपीठाय नमः। चतुरस्रे ॐ कां कामरूपपीठाय नमः। इति संपूज्य। पूजापीठस्य बहिश्चतुर्दिक्षु स्वाग्रमारभ्य प्रादक्षिण्येन पूर्वे ॐ गं गणेशाय नमः। दक्षिणे ॐ क्षां क्षेत्रपालाय नमः। पश्चिमे ॐ पां पादुकाभ्यो नमः। उत्तरे ॐ वं वटुकाय नमः। पीठस्य बहिराग्नेयादिकोणेषु। आग्नेये ॐ जं जयायै नमः। नैर्ऋत्ये ॐ विं विजयायै नमः। वायव्ये ॐ जं जयन्त्यै नमः। ईशाने ॐ अं अपराजितायै नमः। इति संपूज्य पीठस्य चतुर्दिक्षु क्रमेण पूर्वादिप्रादक्षिण्येनैताः पूजयेत्। तत्र पूर्वे ॐ विं विष्णुमायायै

---

१. करैः स्पृष्टानि ते रवे। तेन सत्येन मे देव तीर्थं देहि दिवाकरेति सम्पूर्णो मन्त्रः।

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नमः । ॐ चें चेतनायै नमः । ॐ बुं बुद्ध्यै नमः । ॐ निं निद्रायै नमः । ॐ क्षुं क्षुधायै नमः । इति पञ्चशक्तीः संपूज्य । दक्षिणे ॐ छां छायायै नमः । ॐ शं शक्त्यै नमः । ॐ तृं तृष्णायै नमः । ॐ क्षां क्षान्त्यै नमः । ॐ जां जात्यै नमः । ॐ लं लज्जायै नमः । इति षट्शक्तीः संपूज्य । पश्चिमे ॐ शां शान्त्यै नमः । ॐ श्रं श्रद्धायै नमः । ॐ कां कान्त्यै नमः । ॐ लं लक्ष्म्यै नमः । ॐ धृं धृत्यै नमः । ॐ वृं वृत्त्यै नमः । इति षट्शक्तीः संपूज्य । उत्तरे ॐ स्मृं स्मृत्यै नमः । ॐ दं दयायै नमः । ॐ तुं तुष्ट्यै नमः । ॐ पुं पुष्ट्यै नमः । ॐ मां मात्रे नमः । ॐ भ्रां भ्रान्त्यै नमः । इति षट्शक्तीः संपूज्य । नालमूले आधारादिचतुष्टयं पूजयेत् । ऊर्ध्वोर्ध्वक्रमेण । ॐ आं आधाराय नमः । ॐ कूं कूर्माय नमः । ॐ शें शेषाय नमः । ॐ पृं पृथिव्यै नमः । ॐ नां नालाय नमः । ॐ पं पद्माय नमः । इति संपूज्य ज्ञानामृतसुतृप्तात्मा मण्डलार्चनमारभेत । तत्राष्टपत्रे पूर्वादीशानान्ता पूजा । पूर्वदले ॐ ब्रं ब्रह्माण्यै हंसवाहनायै नमः । आग्नेयदले ॐ मां माहेश्वर्यै वृषभारूढायै नमः । दक्षिणदले ॐ कौं कौमार्यै मयूरवाहनायै नमः । नैर्ऋत्ये ॐ वैं वैष्णव्यै गरुडोपरिसंस्थितायै नमः । पश्चिमे ॐ यं यज्ञवाराह्यै दंष्ट्रोद्धृतवसुन्धरायै नमः । वायव्ये ॐ नां नारसिंह्यै

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

महास्वनायै नमः । उत्तरे ॐ ऐं ऐन्द्र्यै गजराजसमारूढ़ायै नमः । ईशाने ॐ चां चामुण्डायै गणनाथपरिवारायै सदा रुद्रेण संयुतायै मुण्डमण्डितायै नमः । एताः संपूज्य षट्कोणदेवीर्ब्रह्माणीकर्णिकास्पर्शिकोणमारभ्य दक्षावर्तेन पूजयेत् । अग्रकोणे ॐ नं नन्दजायै हेमगर्भायै नमः । आग्नेयकोणे ॐ रं रक्तदन्तिकायै सुरक्तायै नमः । नैर्ऋत्ये ॐ शां शाकम्भर्यै नीलायै नमः । पश्चिमे ॐ दुं दुर्गायै सर्वदुःखहारिण्यै नमः । वायव्ये ॐ भीं भीमायै दंष्ट्राञ्चितमुखायै नीलायै पात्रशिरोधरायै नमः । ईशाने भ्रां भ्रामर्यै तेजोमण्डलदुर्द्धर्षायै वरदायै नमः । इति संपूज्य । सपुष्पाञ्जलिः षट्कोणकर्णिकामध्यगतप्रथमबीजे श्रीमहाकालीं रहस्योक्तध्यानरूपां दशवक्त्रां दशभुजां दशपादामञ्जनप्रभां त्रिंशल्लोचनमालया राजमानां दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तं खड्गबाणगदाशूलचक्रपाशशङ्खभुशुण्डीपरिघकार्मुकमुण्डानि धारयन्तीं ध्यात्वा ऐं महाकाल्यै नमः इति श्रीमहाकालीं यथालाभोपचारैः संपूज्य । मध्यबीजे श्रीमहालक्ष्मीं रहस्योक्तरूपां श्वेताननां नीलभुजां सुश्वेतस्तनमण्डलां रक्तमध्यां रक्तपादां नीलजङ्घां रूपयौवनोन्मदां सुचित्रजघनां चित्रमाल्याम्बरविलेपनामष्टादशभुजां दक्षिणाधःकरमारभ्य वामाधःकरपर्यन्तमक्षमालाकमलबाणासिकुलिशगदाचक्रत्रिशूलपरशुशङ्खघण्टापाश—

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शक्तिदण्डचर्मचापपानपात्रकमण्डलून्दधतीं ध्यात्वा ॐ ह्रीं महालक्ष्म्यै नमः । इति यथा-लाभोपचारैः संपूज्य । कामबीजे श्रीमहासरस्वतीं शुक्लवर्णां शुक्लमाल्यानुलेपनविभूषण-वस्त्रवतीमष्टभुजां दक्षाधःकरमारभ्य वामाधःकरपर्यन्तं बाणमुसलशूलचक्रशङ्खघण्टालाङ्गलधनूंषि बिभ्रतीं ध्यात्वा ॐ क्लीं सरस्वत्यै नमः इति यथालाभोपचारैः संपूज्य श्रीमहालक्ष्म्या वामभागे छिन्नशीर्षं महिषं ध्यात्वा ॐ मं महिषाय नमः इति गन्धादिनैवेद्यान्तोपचारैः संपूज्य श्रीमहा-लक्ष्मीदक्षभागे सिंहं ध्यात्वा ॐ सिं सिंहाय नमः इति यथालाभोपचारैः संपूज्य संतर्प्य यन्त्राग्रे सर्वोत्तमं पीठं संस्थाप्य तत्र रक्तवस्त्रतूलिकादि समास्तीर्य तन्मध्ये पुष्पं दत्वा योग-मुद्रया श्रीमहालक्ष्मीं मध्यबीजे चिरं ध्यात्वा तया मण्डलस्थसर्वशक्तिभ्य ऐक्यं विभाव्य मण्डलात्पीठे समाह्वयेत् । मूलं महालक्ष्मि एह्येहि आगच्छ २ सन्निधिं कुरु २ ॐ महा-पद्मवनान्तस्थे कारणानन्दविग्रहे । सर्वभूतहिते मातरेह्येहि परमेश्वरि । इति पठित्वा मूलमुच्चार्य पीठे पुष्पाञ्जलिं क्षिपेत् । तत आवाहनीं मुद्रां प्रदर्श्य । ॐ देवेशि भक्तिसुलभे सर्वावरणसंयुते । यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव । इति प्रार्थ्य मूलमुच्चार्य श्रीमहालक्ष्मि इह तिष्ठ तिष्ठेति स्थापनीं मुद्रां प्रदर्श्य । मूलं श्रीमहालक्ष्मि इह सन्निधेहि

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सन्निधेहि इति संनिधापनमुद्रया संनिधाप्य। मूलं श्रीमहालक्ष्मि इह संनिरुद्धा भव २ इति संनिरोधनमुद्रया संनिरुध्य। मूलं श्रीमहालक्ष्मि इह संमुखीभव २ इति संमुखीकरणमुद्रया संमुखीकृत्य। मूलं श्रीमहालक्ष्मि इहावगुण्ठिता भव २ इत्यवगुण्ठनमुद्रयावगुण्ठ्य। श्रीदेव्यङ्गे षडङ्गानि विन्यस्य मूलमुच्चार्य श्रीमहालक्ष्मि सकलीकृता भवेत्युकत्वा। पुनर्मूलं श्रीभगवत्यमृतीकृता भवेति देव्याः शिरसि धेनुमुद्रां प्रदर्शयन्नमृतवृष्टिं संचिन्त्य। पुनर्मूलं श्रीभगवति परमीकृता भवेति परमीकरणमुद्रां बद्ध्वा परमामृतमयीं भावयेदिति नवमुद्राः प्रदर्श्य अर्घोदकेन देवीं संप्रोक्ष्य लेलिहानमुद्रया। आं ह्रीं क्रों श्रीमहालक्ष्म्याः प्राणाः इह प्राणाः ३ श्रीमहालक्ष्म्याः जीव इह स्थितः ३ श्रीमहालक्ष्म्याः सर्वेन्द्रियाणि इह स्थितानि ३ श्रीमहालक्ष्म्याः वाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। इति श्रीदेव्याः प्राणान् प्रतिष्ठाप्य। अक्षमाला, कमल, बाण, खड्ग, वज्र, गदा, चक्र, त्रिशूल, परशु, शङ्ख, घण्टा, पाश, शक्ति, दण्ड, चर्म, चाप, पानपात्र, कमण्डलु, इत्यष्टादशमुद्राः प्रदर्श्य। मूलं श्रीमहालक्ष्म्यै एतत्पाद्यं नमः इति श्यामार्कदूर्वाब्जविष्णुक्रान्ताभिः पाद्यं पादयोर्दद्यात्। मूलं इदमर्घ्यं स्वाहा इति पुष्पाक्षतचन्दनयुतजलेनार्घ्यं शिरसि। इत्यर्घ्यं दत्त्वा धेनुमुद्रां प्रदर्श्य मूलं इदमाचमनीयं श्रीमहालक्ष्म्यै

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

वं इति जातीलवङ्गकक्कोलैराचमनीयं मुखे। मूलं एष मधुपर्कः श्रीमहालक्ष्म्यै वं इत्याज्य-दधिमध्वात्मकं मधुपर्कं मुखे। पुनराचमनीयं पूर्ववत्। मूलं श्रीमहालक्ष्मि इदं स्नानीयं नमः इति सर्वाङ्गे सुगन्धतैलेनाभ्यज्य सुगन्धामलकादिनोद्वर्त्य शुद्धजलैः स्नापयित्वा पञ्चामृतैर-भिषिच्य पुनर्नानातीर्थजलैरभिषिच्य प्राग्वदाचमनीयं दत्त्वा योनिमुद्रां प्रदर्श्य मूलं एतानि वस्त्राभरणानि श्रीमहालक्ष्म्यै निवेदयामि नमः इति चित्रे वाससी परिधाप्य प्राग्वदाचमनीयं दत्त्वा। मूलं श्रीमहालक्ष्मि एष ते गन्धो नमः इति चन्दनकर्पूरकालागर्वात्मकं गन्धं मध्यमानामाङ्गुष्ठैः शिरसि दद्यात्। मूलं श्रीमहालक्ष्मि इमानि पुष्पाणि वौषट् इति पुष्पाणि शिरसि। ततः मूलेन उत्तमाङ्गहृदाधारपादसर्वाङ्गेषु पञ्च पुष्पाञ्जलीन् दत्त्वा तथैव पुष्पमालामपि समर्प्य तथैव बिल्वपत्राणि गन्धालोडितानक्षतांश्च समर्प्य धूपदीपौ दद्यात्। यथा—धूपभाजनमस्त्रेण प्रोक्ष्य नमः इत्यभ्यर्च्य मूलान्ते श्रीमहालक्ष्मि एष ते धूपो नमः इत्युत्सृज्य ॐ जयध्वनि मन्त्रमातः स्वाहा इति वामभागस्थितां घण्टां संपूज्य तां वामहस्तेन वादयन् मूलं गायत्रीं चोच्चरन् त्रिघोत्तोल्य श्रीदेवीं धूपयित्वा देव्या वामे स्थापयेत्। एवं मूलं श्रीभगवति एष ते दीपो नमः इति दीपं समर्प्य देव्या दक्षिणे स्थापयेत्। उत्सर्गस्तु

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

सर्वेषामर्घोदकेन कार्यः । अथ नैवेद्यं यथा–देव्या पुरतस्त्रिकोणवृत्तचतुरस्रं मण्डलं कृत्वा ह्रीं आधारशक्तये नमः इत्याधारशक्तिं संपूज्य तदुपरि नैवेद्यपूरितं पात्रं संस्थाप्य अस्त्रेण संरक्ष्य चक्रमुद्रया यमित्यस्य दशवारजपेन तद्दोषान् संशोष्य रमित्यस्य दशवारजपेन दोषान् संदह्य वमित्यस्य दशवारजपेन धेनुमुद्रयामृतीकृत्य मूलेनाभिमन्त्र्य नमः इति तत्र पुष्पं दत्त्वा मूलान्ते इदं नैवेद्यं श्रीमहालक्ष्म्यै निवेदयामि इति निवेद्य । ॐ अमृतोपस्तरणमसि स्वाहा इत्यापोशानं दत्त्वा । वामहस्तेन ग्रासमुद्रां बद्ध्वा दक्षिणहस्तेन प्राणादिपञ्चमुद्राः प्रदर्शयेत् । ॐ प्राणाय स्वाहा इति कनिष्ठानामाङ्गुष्ठेन । ॐ अपानाय स्वाहा इति तर्जनीमध्यमाङ्गुष्ठेन । ॐ व्यानाय स्वाहा इति मध्यमानामाङ्गुष्ठेन । ॐ उदानाय स्वाहा इति तर्जनी मध्यमानामाङ्गुष्ठेन । ॐ समानाय स्वाहा इति सर्वाङ्गुलीभिरंगुष्ठेन स्पृरोत् । ततः सुशीतलं जलं दत्त्वा देवीं तृप्तां विभाव्य । ॐ अमृतापिधानमसि स्वाहा इत्यापोशानं दत्त्वा । हस्तास्यक्षालनमाचमनीयं च दत्वा । ताम्बूलममृतीकृत्य मूलेनाभिमन्त्र्य तदुपरि पुष्पं दत्त्वा वामहस्ततत्त्वमुद्रया स्पृशन् दक्षिणेनार्घोदकेन मूलं इदं ताम्बूलं श्रीमहालक्ष्म्यै निवेदयामि इति निवेद्य श्रीदेवीं सुप्रसन्नां विभाव्य । प्रणवेन प्राणायामं नवार्णमन्त्रस्य ऋष्यादीन् स्मृत्वा यथासंकल्पं जपं विधाय रसस्यत्रयेण श्रीचण्डिकां सप्तशतमन्त्रेण स्तुत्वा पुनर्मूलमष्टोत्तरशतं जपित्वा पायसेन तिलसर्पिषा

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

च दशांशं हुत्वा नवार्णेनापि हुत्वा अन्ते श्रीदेवीं' ॐ नमो देव्यै महादेव्यै' इति श्लोकमन्त्रेणापि हुत्वा ऋतुभवैः फलैरपि हुत्वा तज्जपं होमं च श्रीदेव्यै समर्प्य श्रीमहालक्ष्मीं प्रणम्य । शूलेन पाहि नो देवीत्यादिचतुर्भिर्मन्त्रैः प्रदक्षिणां विधाय श्रीचण्डिकाध्यानतत्परः आसने स्थित्वा कृताञ्जलिः । 'ॐ सर्वस्वरूपे सर्वेशे' इत्यादिभिः 'लोकानां वरदा भवे'त्येतैर्मन्त्रैः प्रणतः संप्रार्थ्य मनोवाञ्छितं श्रीदेव्यै निवेद्य संहारमुद्रया श्रीदेवीं स्वहृदयकमलमानयेत् । ततोऽर्घ्यपात्रमुत्थाप्य ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि । यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ।। इत्युच्चार्य विसृजेत् । निर्माल्यं पवित्रदेशे निःक्षिप्य सुखं विहरेदिति शिवम् । अनेन क्रमेण नवार्णं सप्तशतीस्तोत्रं वा संसाध्य यथार्थफलभाग्भवेदिति ।

।। इति खिलमार्कण्डेयक्रमेण श्रीचण्डिकापूजापद्धतिः ।।

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीचण्डी पूजापद्धति का हिन्दी अनुवाद

सौभाग्यशाली साधक गुरुमुख से विधिपूर्वक नवार्ण मन्त्र अथवा सप्तशती की दीक्षा लेकर गुरु द्वारा निर्दिष्ट प्रायोगिक विधि-विधान को भलीभाँति समझकर सिद्धक्षेत्र, रमणीय पर्वतप्रदेश अथवा किसी पुण्य-भूमि में वायु तथा धूप से सुरक्षित कुटी का निर्माण कर साधना आरम्भ करे। अनन्तर साधक ब्राह्ममुहूर्त (दो घड़ी रात्रि शेष रहने पर) में निद्रा त्याग कर लघुशंका आदि से निवृत्त होकर तथा हाथ-पैर धोकर, पवित्र होकर, शुद्ध वस्त्र पहिनकर, पवित्र आसन पर बैठकर, ब्रह्मरन्ध्र (शिर का मध्य भाग) में स्थित श्वेत सहस्रदल कमल की कर्णिका में अवस्थित, स्फटिक के समान कान्ति-युक्त, ध्यानमुद्रा में लीन, द्विभुज (दो हाथ वाले) दाहिने और बांये हाथ में क्रमशः वर एवं अभय की मुद्रा में अवस्थित, श्वेतवस्त्र एवं श्वेतचन्दन से विभूषित श्रीगुरुदेव का ध्यान कर हं यं वं रं लं इन पंचभूत बीजों से उनकी मानसिक पूजा करके—

'ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥१॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥२॥
गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुरेव महेश्वरः।
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः॥३॥

इन तीनों मन्त्रों से स्तुति करके साष्टाङ्ग प्रणाम करे तथा उनकी आज्ञा लेकर हृदयकमल में गुरु द्वारा उपदिष्ट इष्टदेवता के स्वरूप का ध्यान कर पूर्वोक्त मानसोपचार (मानसिक पूजा) से पूजन कर

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ऋषि, छन्द, देवता आदि का शरीर में न्यास करके दस बार मूल मंत्र का जप करे और उसे देवी को समर्पित कर—

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम्।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव॥
असुरासृग्वसापङ्कचर्चितस्ते करोज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्॥

सप्त. अ. ११, मन्त्र २४–२८

इन मन्त्रों से भगवती चण्डिका की स्तुति करे। अनन्तर प्राणायाम करके हाथ जोड़कर प्रार्थना करे और भूमि को प्रणाम कर शौच आदि आवश्यक क्रिया से निवृत्त होकर नदी, कूप या सरोवर आदि पर जाकर जिस दिन जिस वृक्ष की दातून विहित हो उससे—

"ॐ क्लीं कामदेवसर्वजनप्रियाय नमः।

इस मन्त्र का उच्चारण कर दांतों की तथा जीभ की शुद्धि करे। अनन्तर कनिष्ठिका अंगुली से वाग्भव बीज लिखकर अच्छीतरह कुल्ला कर मुख की शुद्धि करे। मूलमन्त्र से अभिमन्त्रित जल से मुंह धोकर, नाभि पर्यन्त जल में—

इमं मे गङ्गे यमुने सरस्वति शुतद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणु ह्यासुषोमया॥

इन मन्त्रों को पढ़कर स्मार्तविधान से स्नान कर नवार्णमन्त्र बोलकर कुम्भमुद्रा से अपने शिरोभाग का आसिंचन करे तथा जल से बाहर निकल कर धुली हुई धोती पहने एवं दुपट्टा या अंगोछा

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

धारण करे। अनन्तर अपनी वेदशाखा में विहित वैदिकी संध्या की उपासना करके तर्पण करे। संध्या तर्पण करने के बाद—

ॐ ह्रीं चण्डिकायै हृदयाय नमः ।
ॐ ह्रीं चण्डिकायै शिरसे स्वाहा ।
ॐ ह्रीं चण्डिकायै शिखायै वषट् ।
ॐ ह्रीं चण्डिकायै कवचाय हुम् ।
ॐ ह्रीं चण्डिकायै नेत्रत्रयाय वौषट् ।
ॐ ह्रीं चण्डिकायै अस्त्राय फट् ।

इन छः मन्त्रों से षडङ्गन्यास कर ध्यानक्रम से श्रीदेवी का ध्यान करके मूलमन्त्र नवार्ण के अन्त में **'श्रीचण्डिका तृप्यताम्'** इस मन्त्र से १०८ बार अथवा ५४ बार या इस संख्या के भी आधे भाग अर्थात् अठ्ठाइस बार सुगन्धित पुष्प से मिश्रित जल से श्रीदेवी का तर्पण करे। अनन्तर **ॐ कात्यायन्यै विद्महे कन्यकुमारि धीमहि तन्नो दुर्गा प्रचोदयात् ।**

इस गायत्री मन्त्र का यथाशक्ति जप करके प्राणायामपूर्वक श्रीदेवी को जप का समर्पण करे। इस कृत्य का सम्पादन करने के बाद जलकुम्भ (पूजा के लिए जल लाने का घड़ा) लेकर पूजा के स्थान पर आकर, पूजागृह के बाहर ही हाथ-पैर धोकर गन्ध (श्वेत, रक्त चन्दन) अक्षत (विना टूटा हुआ चावल) पुष्प, विल्व पत्र (विल्व वृक्ष का पत्ता), धूप, दीप तथा नैवेद्य (भोग लगाने के लिए फल, मेवा या मधुर वस्तु) आदि समस्त पूजनसामग्री का सम्पादन करने के बाद पूजागृह के द्वार की पूजा करे। द्वारपूजा की विधि :—

द्वार के बाहर आसन बिछाकर पूजा की भूमि पर जल से त्रिकोण, वृत्त, चतुरस्र मण्डल लिखकर चन्दन, अक्षत और पुष्प से **'ॐ ह्रीं द्वारार्घ्यमण्डलाय नमः'** इस मन्त्र से उस मण्डल की पूजा करके **'फट्'** इस अस्त्र मन्त्र से आधारसहित पात्र का प्रक्षालन करके, पहले त्रिपादी और उसके बाद उसके ऊपर पात्र स्थापित करे। उस पात्र को सुगन्धित जल से

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पूजा करके साधक अपने शरीर के वामांग को संकुचित कर पूजागृह के भीतर प्रविष्ट होकर नैर्ऋत्य कोण में **ॐ वास्तुपुरुषाय नमः**। इस मन्त्र से गन्ध और अक्षत से पूजा करे। आसन के स्थान पर लाल चन्दन से चतुरस्र बनाकर **पृं पृथिव्यै नमः**। इस मन्त्र से गन्धाक्षत पुष्प से उस मण्डल का पूजन कर उस पर आसन बिछाकर—

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

इस मन्त्र से प्रार्थना कर आसन पर बैठे तथा शिखाबन्धन कर प्राणायाम और संकल्प करके तत्वत्रय से आचमन करे—**ॐ आत्म तत्त्वाय स्वाहा। ॐ विद्यातत्त्वाय स्वाहा। ॐ शिवतत्त्वाय स्वाहा।** आचमन करने के बाद अपने दाहिने भाग में **ॐ हरये नमः** तथा बाँये भाग में **ॐ ईश्वराय नमः**। इस मन्त्र से गन्धाक्षत पुष्प से इन दोनों की पूजा करके पूर्व दिशा की ओर मुख करके बैठे और शुद्धचित्त होकर

परिपूर्ण करके अंकुश मुद्रा से तीर्थों का आवाहन करे। अनन्तर—

'ॐगङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु॥'

इस मन्त्र से धेनुमुद्रा द्वारा अमृतीकरण करके मूलमन्त्र से आठवार इसको अभिमन्त्रित करे। इसके बाद इस जल से **ॐ आत्मतत्त्वाय स्वाहा। ॐ विद्या-तत्त्वाय स्वाहा। ॐ शिवतत्त्वाय स्वाहा।** इन तत्त्वत्रय मन्त्रों का उच्चारण कर तीन बार आचमन करके द्वारपूजा करे। द्वार की ऊपरी शाखा की दाहिनी ओर—**ॐ धात्रे नमः**, वायीं ओर—**ॐ विधात्रे नमः** एवं द्वार की नीचे वाली शाखा के दाहिनी ओर—**ॐ गङ्गायै नमः** तथा बायीं ओर—**ॐ यमुनायै नमः** से पूजा करे। द्वार के ऊपर मध्य भाग में **ॐ द्वारश्रियै नमः** तथा नीचे देहली पर **ॐ देहल्यै नमः**। इस मन्त्र से

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

किसी निर्मल पीठ (स्थान) पर चन्दन, अगरु, कुंकुम से षट्कोण, अष्टदल और भूपुर से संयुक्त यन्त्र बनाकर षट्कोण के मध्य में क्रमशः ऐं ह्रीं क्लीं इन बीजों को लिखकर भूतशुद्धि करे पद्मासन से बैठकर, मौन होकर मूलाधार कमल में सोम, सूर्य और अग्निस्वरूपिणी एवं सूक्ष्म तथा विषतन्तु अर्थात् कमलनाल के बारीक रेशे के समान जीवकला के रूप में प्रकाशमान कुण्डलिनी का ध्यान कर शरीर में स्थित पद्माकार षट्चक्रों का भेदन करते हुए सहस्रदलकमल के रूप में अवस्थित ब्रह्मरन्ध्र में उसे लाकर एवं पृथ्वी, अप्, तेज, वायु, आकाश, गन्ध, रस, रूप, स्पर्श, शब्द, नासिका, जिह्वा, त्वक्, चक्षु, श्रोत्र, वाक्, पाणि, पाद, पायु, उपस्थ, प्रकृति, मन, बुद्धि, अहंकार इन चौबीस तत्त्वों की अपने अपने मूल कारण में विलीन होने की भावना करके पूरक, कुम्भक, रेचक इस प्राणायाम के क्रम से कृष्णवर्ण (काले रंग का) 'यं' इस वायु बीज का सोलह वार मानसिक जप करके वायु का आपूरण कर पुनः इसी बीज का चौसठ बार जप करके वायु का कुम्भक (अन्तर्निरोध) करके फिर इसी बीज का बत्तीस बार जप करके नासिका के दाहिने छिद्र से रेचन (वायु निर्गमन) करे। इस प्रकार देह में अवस्थित पृथिव्यादि पंचभूतों को शुष्क हुआ मानकर पुनः पिंगला (नासिका का वाम भाग) से 'रं' इस वह्नि (अग्नि) बीज का रक्त (लाल) रूप में ध्यान करते हुए सोलह बार के जप से पूरक, चौंसठ बार के जप से कुम्भक तथा बत्तीस वार के जप से रेचक करके शुष्क भूतों का दाह कर पुनः उसी प्रकार 'इडा' (नासिका का दक्षिण भाग) से 'वं' इस वरुण बीज का शुक्ल वर्ण (सफेद रंग) के रूप में ध्यान करते हुए पहले की तरह सोलह बार जप के द्वारा पूरक करके उसके द्वारा निकले हुए अमृत से शरीर को आप्लावित (अमृत स्नात) करके चैतन्य, पंचभूत तथा उससे सम्बन्धित चौवीस तत्त्वों को निर्दिष्ट क्रम से उत्पन्न कर 'लं' इस पीतवर्ण (पीले रंग के) पृथ्वी बीज के चौंसठ बार जप से कुम्भक करके पूर्ववत् पिंगला से रेचन करे। अनन्तर कुण्डलिनी को पुनः मूलाधार में प्रतिष्ठित करे। इस प्रकार

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

भूतशुद्धि करके समस्त भ्रमों को स्वयं से दूर कर शान्तचित्त होकर वाम भाग में श्रीगुरु का, दक्षिण भाग में श्रीगणेश का एवं मध्य में श्रीमहालक्ष्मी का ध्यान करके प्रणाम करे और फिर पूजा से सम्बन्धित निम्नलिखित एकादश (ग्यारह) न्यासों का क्रमशः शरीर में विन्यास करे। इन न्यासों में प्रथम मातृका-न्यास इस प्रकार है :—

अथ मातृकान्यासः ।

ॐ अं नमः मूर्ध्नि । ॐ आं नमः ललाटे । ॐ इं नमः दक्षनेत्रे । ॐ ईं नमः वामनेत्रे । ॐ उं नमः दक्षकपोले । ॐ ऊं नमः वामकपोले । ॐ ऋं नमः दक्षश्रुतौ । ॐ ॠं नमः वामश्रुतौ । ॐ ऌं नमः दक्षनासायाम् । ॐ ॡं नमः वामनासायाम् । ॐ एं नमः ऊर्ध्वोष्ठे । ॐ ऐं नमः अधरोष्ठे । ॐ ओं नमः ऊर्ध्वदन्तपङ्क्तौ । ॐ औं नमः अधोदन्तपङ्क्तौ । ॐ अं नमः जिह्वायाम् । ॐ अः नमः तालुनि । ॐ कं नमः दक्षबाहौ । ॐ खं नमः दक्षकूर्परे । ॐ गं नमः दक्षमणिबन्धे । ॐ घं नमः दक्षाङ्गुलिमूले । ॐ ङं नमः दक्षाङ्गुल्यग्रे । ॐ चं नमः वामबाहुमूले । ॐ छं नमः तत्कूर्परे । ॐ जं नमः तन्मणिबन्धे । ॐ झं नमः तदङ्गुलिमूले । ॐ ञं नमः तदङ्गुल्यग्रे । ॐ टं नमः दक्षोरुमूले । ॐ ठं नमः दक्षजानुनि । ॐ डं नमः दक्षगुल्फे । ॐ ढं नमः दक्षपादाङ्गुलिमूले । ॐ णं नमः तत्पादाङ्गुल्यग्रे । ॐ तं नमः वामपादोरूमूले । ॐ थं नमः वामजानुनि । ॐ दं नमः वामगुल्फे । ॐ धं नमः तत्पादाङ्गुलिमूले । ॐ नं नमः तत्पादाङ्गुल्यग्रे । ॐ पं नमः दक्षपार्श्वे । ॐ फं नमः वाम-

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पार्श्वे । ॐ बं नमः पृष्ठे । ॐ भं नमः नाभौ । ॐ मं नमः जठरे । ॐ यं त्वगात्मने नमः हृदये । ॐ रं असृगात्मने नमः दक्षांसे । ॐ लं मांसात्मने नमः ककुदि । ॐ वं स्नाय्वात्मने नमः वामांसे । ॐ शं अस्थ्यात्मने नमः हृदयादिदक्षहस्तान्तम् । ॐ षं मज्जात्मने नमः हृदयादिवामहस्तान्तम् । ॐ सं मेदआत्मने नमः हृदयादिदक्षपादान्तम् । ॐ हं पूयात्मने नमः हृदयादिवामपादान्तम् । ॐ ल्डं[१] प्राणात्मने नमः पादादिहृदयान्तम् । ॐ क्षं जीवात्मने नमः हृदयादिशिरोऽन्तम् । इति मातृकान्यासः प्रथमः ॥ १ ॥

अथ सारस्वतन्यासः ।

ॐ ऐं ह्रीं क्लीं नमः कनिष्ठयोः । ॐ ऐं ह्रीं क्लीं नमः अनामयोः । ॐ ऐं ह्रीं क्लीं नमः मध्यमयोः । ॐ ऐं ह्रीं क्लीं नमः तर्जन्योः । ॐ ऐं ह्रीं क्लीं नमः अंगुष्ठयोः । ॐ ऐं ह्रीं क्लीं नमः करतलयोः । ॐ ऐं ह्रीं क्लीं नमः करपृष्ठयोः । ॐ ऐं ह्रीं क्लीं नमः मणिबन्धयोः । ॐ ऐं ह्रीं क्लीं नमः हृदये । ॐ ऐं ह्रीं क्लीं नमः शिरसि । ॐ ऐं ह्रीं क्लीं नमः शिखायाम् । ॐ ऐं ह्रीं क्लीं नमः कवचे । ॐ ऐं ह्रीं क्लीं नमः नेत्रयोः । ॐ ऐं ह्रीं क्लीं नमः करतलकरपृष्ठयोः । ॐ ऐं ह्रीं क्लीं नमः पूर्वे । ॐ ऐं ह्रीं क्लीं नमः आग्नेये । ॐ ऐं ह्रीं क्लीं नमः दक्षिणे । ॐ ऐं ह्रीं क्लीं नमः नैर्ऋत्ये । ॐ ऐं ह्रीं क्लीं नमः पश्चिमे । ॐ ऐं ह्रीं क्लीं नमः वायव्ये । ॐ ऐं ह्रीं क्लीं नमः उत्तरे । ॐ ऐं ह्रीं

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

क्लीं नमः ईशाने। ॐ ऐं ह्रीं क्लीं नमः ऊर्ध्वे। ॐ ऐं ह्रीं क्लीं नमः अधः ॥ इति द्वितीयः सारस्वतो न्यासः ॥

अथ तृतीयो मातृगणन्यासः।

ॐ ह्रीं ब्रह्माणी पूर्वतः पातु। ॐ ह्रीं माहेश्वरी आग्नेय्यां पातु। ॐ ह्रीं कौमारी दक्षिणे पातु। ॐ ह्रीं वैष्णवी नैर्ऋत्ये पातु। ॐ ह्रीं यज्ञवाराही पश्चिमे पातु। ॐ ह्रीं नारसिंही वायव्ये पातु। ॐ ह्रीं ऐन्द्री उत्तरे पातु। ॐ ह्रीं चामुण्डा ईशाने पातु। ॐ ह्रीं व्योमेश्वरी ऊर्ध्वं पातु। ॐ ह्रीं नागेश्वरी पाताले पातु ॥ इति तृतीयो मातृगणन्यासः ॥

अथ चतुर्थः षड्देवीन्यासः।

ॐ कमलाङ्कुशमण्डिता नन्दजा पूर्वाङ्गं पातु। ॐ खड्गपात्रधरा रक्तदन्तिका दक्षिणाङ्गं पातु। ॐ पुष्पपल्लवमूलादिहस्ता शाकम्भरी पश्चिमाङ्गं पातु। ॐ धनुर्बाणधरा दुर्गातिहारिणी दुर्गा वामाङ्गं पातु। ॐ शिरःपात्रकरा भीमा मस्तकाच्चरणपर्यन्तं पातु। ॐ चित्रकान्तिभृद् भ्रामरी चरणाभ्यां शिरःपर्यन्तं पातु ॥ इति चतुर्थः षड्देवीन्यासः ॥

अथ पञ्चमो ब्रह्मादिन्यासः।

ॐ ब्रह्मा सनातनः पादादिनाभिपर्यन्तं पातु। ॐ जनार्दनः नाभेर्विशुद्धिपर्यन्तं नित्यं पातु। ॐ रुद्रस्त्रिलोचनः विशुद्धेः शिखापर्यन्तं पातु। ॐ हंसः पादद्वयं पातु। ॐ वैनतेयः करद्वयं पातु। ॐ वृषभश्चक्षुषी पातु। ॐ जनार्दनः परात्परतरः सर्वानन्दमयो

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

हरिः सर्वाङ्गानि पातु ।। इति पञ्चमो ब्रह्मादिन्यासः ।।

अथ षष्ठो लक्ष्म्यादिन्यासः ।

ॐ अष्टादशभुजा सती महालक्ष्मीर्मध्यं पातु । ॐ अष्टभुजा सरस्वती ऊर्ध्वं पातु । ॐ त्रिशल्लोचनमण्डिता महाकाली अधः पातु । ॐ सिंहो हस्तद्वयं पातु । ॐ परहंसः अक्षिमण्डलं पातु । ॐ महिषेण समायुक्तः प्रेतः पादद्वयं पातु । ॐ महेशानश्चण्डिका च सर्वाङ्गानि पातु ।। इति षष्ठः लक्ष्म्यादिन्यासः ।।

अथ मन्त्रबीजन्यासः सप्तमः ।

ॐ ऐं नमः ब्रह्मरन्ध्रे । ॐ ह्रीं नमः दक्षनेत्रे । ॐ क्लीं नमः वामनेत्रे । ॐ चां नमः दक्षकर्णे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षनासापुटे । ॐ यैं नमः वामनासापुटे । ॐ विं नमः मुखे । ॐ च्चें नमः गुदे ।। इति बीजन्यासः सप्तमः ।।

अथाष्टमो बीजन्यासः ।

ॐ ऐं नमः गुदे । ॐ ह्रीं नमः मुखे । ॐ क्लीं नमः वामनासापुटे । ॐ चां नमः दक्षनासापुटे । ॐ मुं नमः वामकर्णे । ॐ डां नमः दक्षकर्णे । ॐ यैं नमः वामनेत्रे । ॐ विं नमः दक्षनेत्रे । ॐ च्चें नमः ब्रह्मरन्ध्रे ।। इत्यष्टमो बीजन्यासः ।।

अथ नवमो मन्त्रन्यासः ।

ॐ मूलं ९ नमः मस्तकाच्चरणपर्यन्तं

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

पूर्वाङ्गे । ॐ मूलं ६ नमः मस्तकाच्चरणावधि दक्षिणाङ्गे । ॐ मूलं ६ नमः मस्तकाच्चरणावधि पृष्ठे । ॐ मूलं ६ नमः मस्तकाच्चरणावधि वामाङ्गे । ॐ मूलं ६ नमः मस्तकात्पादान्तम् । ॐ मूलं ६ नमः पादादिशिरोऽन्तम् । इति नवमो मन्त्रन्यासः ।।

अथ दशमः षडङ्गन्यासः ।।

ॐ मू० ६ नमः हृदयाय नमः । ॐ मू० ६ नमः शिरसे स्वाहा । ॐ मू० ६ नमः शिखायै वषट् । ॐ मू० ६ नमः कवचाय हुम् । ॐ मू० ६ नमः नेत्रत्रयाय वौषट् । ॐ मू० ६ नमः अस्त्राय फट् । ।। इति षडङ्गन्यासः दशमः ।।

अथैकादशन्यासः ।

ॐ खड्गिनी शूलिनी घोरा इत्येकं मन्त्रं पठित्वा कृष्णवर्णं ध्यायन् नाभ्यादिचरणान्तं व्यापकमुद्रया न्यसेत् । पुनर्बालार्कसदृशं ध्यायन् ॐ शूलेन पाहि नो देवीति श्लोकचतुष्टयं पठित्वा कण्ठादिनाभ्यन्तं पूर्ववन्न्यसेत् । पुनः शुद्धस्फटिकसंकाशं ॐ सर्वस्वरूपे सर्वेशे इत्यादि श्लोकपञ्चकं ध्यात्वा पठन् मूर्धादिकण्ठान्तं न्यसेत् ।। इत्येकादशन्यासः ।।

इन पूर्वोक्त एकादश न्यासों को करने के बाद योनिमुद्रा के द्वारा स्वयं का देवी के रूप में ध्यान करके अपने हृदय में आगे बतलाये जाने वाले पूजापीठ की भावना करके उसके मध्य में मूलमन्त्र (नवार्ण मन्त्र) के तीनों बीजों का ध्यान करके मध्य के बीज में समस्त देवों के शरीर तेज से उत्पन्न श्रीमहालक्ष्मी के रहस्योक्त स्वरूप का ध्यान करके देवी के साथ स्वयं की एकरूपता की भावना कर, उनके

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दक्षिण में (दाहिनी ओर) प्रथम बीज में श्रीमहाकाली के रहस्योक्त स्वरूप का ध्यान करके श्रीमहालक्ष्मी के वाम भाग में तृतीय बीज में श्रीमहासरस्वती के रहस्योक्त रूप का ध्यान करना चाहिए। पूर्वोक्त तीनों शक्तियोंके ध्यानमें उनके आयुधों का ध्यान दाहिने हाथ के नीचे के हाथ से आरम्भ होकर बायें हाथ के नीचे वाले हाथ तक किया जाता है। अपने हृदयकमल में श्रीमहासरस्वती का ध्यान करके अग्रिम पीठपूजा के साथ श्रीमहालक्ष्मी की मानसोपचार पूजा उनकी अङ्गदेवताओं और आवरणदेवताओं के साथ करनी चाहिए। मूलाधार चक्र में आत्मा, अन्तरात्मा, परमात्मा तथा ज्ञानात्मा के स्वरूप में अवस्थित चतुरस्रकुण्ड का कुण्डलिनी की अग्नि से प्रज्वलित रूप में ध्यान कर मूलमन्त्र का उच्चारण करके उसके अन्त में **अहन्तां जुहोमि स्वाहा**, इस मन्त्र का उच्चारण करे। इस प्रकार अहन्ता, असत्य, पैशुन्य, काम, क्रोध, लोभ, मोह, मद, मात्सर्य इन सबको सुषुम्णा स्रुक् से युक्त मनरूपी स्रुवा से पृथक् पृथक् हवन कर सम्पूर्ण वैरिसमूह को निःशेषरूप से दग्ध करने के बाद स्थिरचित्त होकर यथाशक्ति मूलमन्त्र का जप करे एवं जप श्रीदेवी को समर्पित कर बाह्यपूजा करे। बाह्यपूजा का प्रकार—

अपनी दाहिनी ओर भूमि पर रक्तचन्दन मिश्रित जल से त्रिकोण, वृत्त, चतुरस्र बनाकर चन्दन, अक्षत एवं पुष्प से **ऐं ह्रीं व्यापकमण्डलाय नमः**, इस मन्त्र से मण्डल की पूजा कर उसके ऊपर अस्त्रमन्त्र से प्रक्षालित आधारस्वरूप त्रिपादी को स्थापित कर **मं वह्निमण्डलाय दशकलात्मने नमः**, इस मन्त्र से त्रिपादी का पूजन कर, अर्घ्यपात्र को अस्त्रमन्त्र से प्रक्षालित कर त्रिपादी के ऊपर स्थापित करे। अनन्तर **अं अर्कमण्डलाय द्वादशकलात्मने नमः**, इस मन्त्र से चन्दनादि के द्वारा अर्घ्यपात्र का पूजन कर मूलमन्त्र तथा अकार से आरम्भ कर क्षकार पर्यन्त मातृकावर्णों का उच्चारण करते हुए उसको शुद्ध जल से पूर्ण करे एवं उसमें गन्धाक्षत डालकर **ॐ सोममण्डलाय षोडशकलात्मने नमः**, इस मन्त्र

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

से जल में सोममण्डल की भावना कर उसकी पूजा करके सूर्यमण्डल से अंकुशमुद्रा द्वारा—

ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थं देहि दिवाकर॥

इस मन्त्र से तीर्थों का आवाहन कर धेनुमुद्रा द्वारा—

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इस मन्त्र से उस जल का अमृतीकरण करे और **'हुम्'** का उच्चारण कर उसे अवगुण्ठित कर चक्रमुद्रा प्रदर्शित कर, अस्त्र मुद्रा से संरक्षण कर, मूलमन्त्र का आठ वार उच्चारण कर मत्स्यमुद्रा से उसे अभिमन्त्रित करे, पुनः अस्त्र से संरक्षण तथा कवच से अवगुण्ठन करके मूलमन्त्र का उच्चारण करते हुए उस जल से स्वयं का तथा पूजा की वस्तुओं का प्रोक्षण करे तथा गन्धादि से स्वयं को अलंकृत कर देवता के साथ स्वयं के अभिन्न रूप का ध्यान करते हुए पीठपूजा आरम्भ करे। पीठपूजा की विधि :—

पहले लिखे हुए यन्त्र को किसी सुन्दर पीठ पर संस्थापित कर अर्घ्यजल से प्रोक्षण कर षट्कोण में **ॐ ॐकारपीठाय नमः**, अष्टदल में **ॐ पूं पूर्णगिरिपीठाय नमः**, एवं चतुरस्र में **ॐ कां कामरूपपीठाय नमः**, इन मन्त्रों से पूजन करना चाहिए। पूजापीठ के बाहर अपने अग्रभाग से आरम्भ करके चारों दिशाओं में प्रदक्षिणा के क्रम से पूर्व में **ॐ गं गणेशाय नमः**, दक्षिण में **ॐ क्षां क्षेत्रपालाय नमः**, पश्चिम में **ॐ पां पादुकाभ्यो नमः**, उत्तर में **ॐ वं वटुकाय नमः**, पीठ के बाहर आग्नेय कोण में **ॐ जं जयायै नमः**, नैर्ऋत्य कोण में **ॐ विं विजयायै नमः**, वायव्य कोण में **ॐ जं जयन्त्यै नमः**, ईशान कोण में **ॐ अं अपराजितायै नमः** इस प्रकार पूजन कर पीठ की चारों दिशाओं में पूर्ववत् प्रदक्षिणा क्रम से पूर्व दिशा में **ॐ विं विष्णुमायायै नमः**, **ॐ चें चेतनायै नमः**, **ॐ बुं बुद्ध्यै नमः**, **ॐ निं निद्रायै**

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ईशान कोण तक पूजा करनी चाहिए। पूर्वदल में **ॐ ब्रं ब्रह्माण्यै हंसवाहनायै नमः**, आग्नेय दल में **ॐ मां माहेश्वर्यै वृषभारूढायै नमः**, दक्षिण दल में **ॐ कौं कौमार्यै मयूरवाहनायै नमः**, नैर्ऋत्य में **ॐ वैं वैष्णव्यै गरुडोपरिसंस्थितायै नमः**, पश्चिम में **ॐ यं यज्ञवाराह्यै दंष्ट्रोद्धृतवसुन्धरायै नमः**, वायव्य में **ॐ नां नारसिंह्यै महास्वनायै नमः**, उत्तर में **ॐ ऐं ऐन्द्रचै गजराजसमारूढ़ायै नमः**, ईशान में **ॐ चां चामुण्डायै गणनाथपरिवारायै सदा रुद्रेण संयुतायै मुण्डमण्डितायै नमः**, इनका पूजन करने के बाद षट्कोण की ब्रह्माणी प्रभृति देवियों का कर्णिका के स्पर्श करने वाले ब्रह्माणी के कोण से आरम्भ कर के दाहिनी तरफ से पूजन करे। अग्रकोण में **ॐ नं नन्दजायै हेमगर्भायै नमः**, आग्नेय कोण में **ॐ रं रक्त-दन्तिकायै सुरक्तायै नमः**, नैर्ऋत्य में **ॐ शां शाकम्भर्यै नीलायै नमः**, पश्चिम में **ॐ दुं दुर्गायै सर्वदुःखहारिण्यै नमः**, वायव्य में **ॐ भीं भीमायै दंष्ट्राञ्चितमुखाय नीलायै पात्रशिरोधरायै नमः**, **नमः, क्षुं क्षुधाय नमः**, इन पञ्च शक्तियों का पूजन करे। दक्षिण में **ॐ छां छायायै नमः, ॐ शं शक्त्यै नमः, ॐ तृं तृष्णायै नमः, ॐ क्षां क्षान्त्यै नमः, ॐ जां जात्यै नमः, ॐ लं लज्जायै नमः**, इन छः शक्तियों का पूजन करे। पश्चिम में **ॐ शां शान्त्यै नमः, ॐ श्रं श्रद्धायै नमः, ॐ कां कान्त्यै नमः, ॐ लं लक्ष्म्यै नमः, ॐ धृं धृत्यै नमः, ॐ वृं वृत्यै नमः**, इन छः शक्तियों का पूजन करे। उत्तर में **ॐ स्मृं स्मृत्यै नमः, ॐ दं दयायै नमः, ॐ तुं तुष्ट्यै नमः, ॐ पुं पुष्ट्यै नमः, ॐ मां मात्रे नमः, ॐ भ्रां भ्रान्त्यै नमः**, इन छः शक्तियों का पूजन करे। नालमूल में आधारादिचतुष्टय का पूजन करे। ऊर्ध्वोर्ध्व क्रम से **ॐ आं आधाराय नमः, ॐ कूं कूर्माय नमः, ॐ शें शेषाय नमः, ॐ पृं पृथिव्यै नमः, ॐ नां नालायै नमः, ॐ पं पद्माय नमः**।

इनका पूजन कर ज्ञानरूपी अमृत से स्वयं के सुतृप्त होने की भावना कर मण्डलार्चन करना चाहिए। सर्वप्रथम अष्टपत्र में पूर्व से आरम्भ कर

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

ईशान कोण में **ॐ भ्रां भ्रामर्यै तेजोमण्डलदुर्द्धर्षायै वरदायै नमः।**

यह पूजन करने के बाद पुष्पाञ्जलि अर्पित करते हुए षट्कोण कर्णिका के मध्य में अवस्थित प्रथम बीज में श्रीमहाकाली का रहस्योक्त ध्यान प्रकार से दशवक्त्रा, दशभुजा, दशचरणा, अञ्जन के समान कृष्णप्रभा वाली, तीस नेत्रों की माला से सुशोभित एवं दाहिने हाथ के नीचे वाले हाथ से बायें हाथ के नीचे वाले हाथ तक खड्ग, बाण, गदा, शूल, चक्र, पाश, शङ्ख, भुशुण्डी, परिघ, धनुष और मुण्डों को धारण किए हुए श्रीमहाकाली का ध्यान कर **ऐं महाकाल्यै नमः** इस मन्त्र से श्रीमहाकाली का सामर्थ्यानुसार दिव्यपूजन सामग्री से पूजन करे। मध्यबीज में श्रीमहालक्ष्मी का रहस्योक्त ध्यानप्रकार के अनुसार श्वेतानना, नीलभुजा, सुश्वेतस्तनमण्डला, शरीर के मध्य में रक्त आभावाली, रक्तपादा, नीलजङ्घा, रूप एवं यौवन से हर्षित, सुशोभन जघन वाली, विभिन्न रंगों की माला एवं वस्त्रों और अनुलेपों से अलंकृत अष्टादश भुजा, एवं दाहिने अधःकर से बायें अधःकर तक अक्षमाला, कमल, बाण, असि. कुलिश, गदा, चक्र, त्रिशूल, परशु, शङ्ख, घण्टा, पाश, शक्ति, दण्ड, चर्म, चाप, पानपात्र और कमण्डलु को धारण किये हुये श्रीमहालक्ष्मी का ध्यान कर **ॐ ह्रीं महालक्ष्म्यै नमः**, इस मन्त्र से यथाशक्ति उपलब्ध दिव्य सामग्री से पूजन करे। अनन्तर कामबीज में रहस्योक्त ध्यानानुसार शुक्लवर्णा, श्वेतवर्ण की माला, श्वेत अनुलेप एवं वस्त्र से विभूषित, अष्टभुजा, दाहिने अधःकर से बायें अधःकर तक बाण, मुसल, शूल, चक्र, शङ्ख, घण्टा, लाङ्गल, धनुष धारण किये हुए श्रीमहासरस्वती की ध्यान कर **ॐ क्लीं सरस्वत्यै नमः**, इस मन्त्र से यथालाभोपचार पूजन करना चाहिये। श्रीमहा-लक्ष्मी के वामभाग में छिन्नशीर्ष महिष का ध्यान कर **ॐ मं महिषाय नमः**, इस मन्त्र से गन्धाक्षत, धूप, दीप नैवेद्यादि से पूजन कर, श्रीमहालक्ष्मी के दक्षिण भाग में सिंह का ध्यान कर **ॐ सिं सिंहाय नमः**, इस मन्त्र से यथालाभोपचार से पूजन एवं तर्पण कर यन्त्र के अग्रभाग में सर्वोत्तम पीठ चौकी

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

आदि स्थापित कर, उस पर लाल रंग का तूल आदि बिछाकर उसके मध्य में पुष्प का निक्षेप कर मध्य बीज में योगमुद्रा से श्रीमहालक्ष्मी का अनवरत ध्यान कर, मण्डल में अवस्थित सर्वशक्तियों से स्वयं की ऐक्य भावना करके मण्डल से पीठ स्थल पर उन सबका आवाहन करना चाहिए। पुनः मूलमन्त्र के साथ—

महालक्ष्मि एह्येहि आगच्छ २ सन्निधिं कुरु २।
ॐ महापद्मवनान्तस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातरेह्येहि परमेश्वरि।

यह पढ़ कर मूलमन्त्र का उच्चारण कर पीठ पर पुष्पाञ्जलि अर्पित करे। अनन्तर आवाहनी मुद्रा प्रदर्शित कर—

ॐ देवेशि भक्तिसुलभे सर्वावरणसंयुते।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥

यह प्रार्थना कर मूलमन्त्र का उच्चारण कर स्थापनी मुद्रा प्रदर्शित करते हुए **'श्रीमहालक्ष्मि इह तिष्ठ तिष्ठ।'** यह प्रार्थना करे। पुनः सन्निधापन मुद्रा प्रदर्शित करते हुए मूलमन्त्र के साथ **'श्रीमहालक्ष्मि इह सन्निधेहि सन्निधेहि।'** इस प्रकार सन्निधापन करने के बाद सन्निरोधन मुद्रा प्रदर्शित करते हुए मूलमन्त्र के साथ **'श्रीमहालक्ष्मि इह सन्निरुद्धा भव भव।'** इससे सन्निरोधन कर सम्मुखीकरण मुद्रा प्रदर्शित करते हुए मूलमन्त्र के साथ **'श्रीमहालक्ष्मि इह संमुखीभव भव,'** इस प्रकार देवी को सम्मुखीकृत कर अवगुण्ठन मुद्रा प्रदर्शित करते हुए मूल मन्त्र के साथ **'श्रीमहालक्ष्मि इहावगुण्ठिता भव भव,'** इससे अवगुण्ठन करने के बाद श्रीदेवी के अङ्ग में षडङ्गों का न्यास कर मूलमन्त्र का उच्चारण कर **'श्रीमहालक्ष्मि सकलीकृता भव,'** यह कह कर, धेनुमुद्रा प्रदर्शित करते हुए मूलमन्त्र के साथ **'श्रीभगवत्यमृतीकृता भव,'** यह कहकर देवी के मस्तक पर अमृतवृष्टि की भावना करे। पुनः परमीकरणमुद्रा प्रदर्शित कर मूलमन्त्र के साथ **'श्रीभगवति परमीकृता भव,'** इस मन्त्र से देवी को परमामृतमयी के रूप में स्थित मानकर भावना करनी चाहिए। अनन्तर नवमुद्राएं प्रदर्शित कर अर्घ्यजल से देवी का प्रोक्षण करे। फिर लेलिहान मुद्रा के द्वारा प्राणप्रतिष्ठा करनी चाहिए।

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

श्रीदेवी की प्राणप्रतिष्ठा के बाद अक्षमाला, कमल, बाण, खड्ग, वज्र, गदा, चक्र, त्रिशूल, परशु, शङ्ख, घण्टा, पाश, शक्ति, दण्ड, चर्म, चाप, पानपात्र, कमण्डलु के माध्यम से अठारह मुद्राएं प्रदर्शित कर, मूलमन्त्र के साथ **'श्रीमहालक्ष्म्यै एतत्पाद्यं नमः।'** यह उच्चारित कर श्यामा तुलसी, आकड़ा, दूर्वा, कमल, विष्णुकान्ता सहित पाद्य (जल) को देवी के चरणों में अर्पित करना चाहिए। पुनः देवी के मस्तक पर पुष्प, अक्षत, चन्दन से संयुक्त जल से, मूल के साथ **इदमर्घ्यं स्वाहा**। इससे अर्घ्य देना चाहिए। अर्घ्य देकर धेनुमुद्रा प्रदर्शित कर, मूलमन्त्र के साथ **'इदमाचमनीयं श्रीमहालक्ष्म्यै वं।'** इस मन्त्र से जातीलवङ्गकक्कोल से संयुक्त आचमन मुख में देना चाहिये। पुनः घृत, दधि, मधु से संयुक्त मधुपर्क मुख में अर्पितकर पूर्ववत् आचमन कराना चाहिए। मूलमन्त्र के साथ **'श्रीमहालक्ष्मि इदं स्नानीयं नमः।'** इस से सर्वाङ्ग में सुगन्धित तैल का अभ्यङ्ग करके सुगन्ध एवं आमलक आदि पिष्टद्रव्य से उद्वर्तन (शुद्धीकरण) कर शुद्धजल से स्नान कराकर पञ्चामृत से अभिषेक कर, पुनः नाना तीर्थजलों से अभिषेक कर पूर्ववत् आचमन दे कर योनिमुद्रा प्रदर्शित कर, मूल के साथ **'एतानि वस्त्राभरणानि श्रीमहालक्ष्म्यै निवेदयामि नमः।'** इस मन्त्र से श्रीदेवी को विभिन्न रंग के परिधान से सुशोभित कर पूर्ववत् आचमन करावे। अनन्तर चन्दन, कर्पूर, काले अगर से संपादित गन्धद्रव्य को मध्यमा, अनामिका एवं अंगुष्ठ के संयोजन द्वारा, मूल के साथ **श्रीमहालक्ष्मि एष ते गन्धो नमः।** इस मन्त्र से देवी के मस्तक पर अर्पित करे। पुनः मूल के साथ **'श्रीमहालक्ष्मि इमानि पुष्पाणि वौषट्।'** इस मन्त्र से मस्तक पर पुष्प अर्पित करे। इसके बाद मूलमन्त्र का उच्चारण करते हुए मस्तक, हृदय, आधार, पादद्वय सहित सर्वाङ्गों में पांच बार पुष्पाञ्जलि अर्पित कर उसी प्रकार पुष्प माला भी समर्पित कर, विल्व पत्र, गन्धालोडित (गन्ध से मिश्रित) अक्षत समर्पित कर धूप-दीप अर्पण करे। **धूप-दीप के अर्पण का प्रकार**—धूप करने के पात्र को अस्त्र से प्रोक्षण कर, **'नमः'** इससे अर्चना कर मूलमन्त्र के अन्त में **'श्रीमहालक्ष्मि एष ते धूपो**

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

नमः ।' इससे उत्सर्ग कर 'ॐ जयध्वनि मन्त्रमातः स्वाहा ।' इस मन्त्र से वाम भाग में अवस्थित घण्टा का पूजन कर उसे बायें हाथ से बजाते हुए मूल मन्त्र एवं गायत्री का उच्चारण करते हुए तीन बार बजाकर श्रीदेवी को धूपित कर, धूपपात्र को वाम भाग में स्थापित करना चाहिए । इसी तरह मूल के साथ 'श्रीभगवति एष ते दीपो नमः ।' इस मन्त्र से दीप अर्पित कर देवी के दाहिने भाग में स्थापित करना चाहिए। देवता के निमित्त वस्तुसमर्पण सर्वत्र अर्घोदक से ही करना चाहिये। इसके बाद देवी को नैवेद्य अर्पित करने के लिए, उन के सम्मुख त्रिकोण, वृत्त, चतुरस्र के रूप में मण्डल का निर्माण कर 'ह्रीं आधारशक्तये नमः ।' इस मन्त्र से आधार शक्ति का पूजन कर उसके ऊपर नैवेद्य से परिपूरित पात्र स्थापित कर, अस्त्र से संरक्षित कर, चक्रमुद्रा के द्वारा 'यम्' इस बीज का दस बार जप कर, उसके दोषों का शोषण कर, 'रं' इस मन्त्र का दस बार जप कर दोषों को दग्ध कर 'वम्' इस बीज का दस बार जप कर धनुमुद्रा से अमृतीकृत कर, मूलमन्त्र से अभिमन्त्रित कर 'नमः' इस मन्त्र से उसमें पुष्प का निक्षेप कर, मूल के साथ 'इदं नैवेद्यं श्रीमहालक्ष्म्यै निवेदयामि ।' इस मन्त्र से निवेदन कर ॐ अमृतोपस्तरणमसि स्वाहा । इस मन्त्र से जल छोड़कर वामहस्त से ग्रासमुद्रा बांधकर दाहिने हाथ से प्राणादि पञ्चमुद्राओं को प्रदर्शित करना चाहिए। ॐ प्राणाय स्वाहा । इस मन्त्र से कनिष्ठिका, अनामिका एवं अंगुष्ठ के संयोजन से ॐ अपानाय स्वाहा । इस मन्त्र से तर्जनी, मध्यमा एवं अंगुष्ठ के संयोजन से ॐ व्यानाय स्वाहा, इस मन्त्र से मध्यमा, अनामिका एवं अंगुष्ठ के संयोजन से ॐ उदानाय स्वाहा इस मन्त्र से तर्जनी, मध्यमा एवं अंगुष्ठ के संयोजन से ॐ समानाय स्वाहा, इस मन्त्र से सभी अंगुलियों के साथ अंगूठे का स्पर्श करे। अनन्तर सुशीतल जल प्रदान कर, देवी के तृप्तहोने की भावना कर ॐ अमृतापिधानमसि स्वाहा, इस मन्त्र से जल प्रक्षेप कर, हाथ और मुख के प्रक्षालनार्थ आचमन देकर, ताम्बूल को अमृतीकृत कर मूल मन्त्र से अभिमन्त्रित कर, उस पर पुष्प निक्षेप करके वामहस्त की तत्त्वमुद्रा के द्वारा उसका स्पर्श, कर

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

दाहिने हाथ के द्वारा अर्घोदक से, मूलमन्त्र के साथ **इदं ताम्बूलं श्रीमहालक्ष्म्यै निवेदयामि,** इस मन्त्र से ताम्बूल निवेदित कर श्रीदेवी के सर्वथा प्रसन्न होने की भावना करे। प्रणव के द्वारा प्राणायाम कर, नवार्ण मन्त्र के ऋष्यादि का स्मरण कर संकल्पानुसार जप करे। इसके बाद रहस्यत्रय के साथ श्रीचण्डिका की सात सौ मन्त्रों (सप्तशती) से स्तुति कर, पुनः अष्टोत्तरशत मूलमन्त्र का जप करना चाहिए। अनन्तर खीर, तिल एवं घृत से दशांश हवन कर, नवार्ण से भी दशांश हवन करना चाहिये। अन्त में—

"ॐ नमो देव्यै महादेव्य शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताःस्म ताम् ॥"

इस श्लोक-मन्त्र से हवन कर ऋतुफलों से भी आहुति देकर, किये हुए जप एवं हवन को देवी को अर्पित कर श्रीमहालक्ष्मी को प्रणाम करे।

"शूलेन पाहि नो" आदि चार मन्त्रों से प्रदक्षिणा करके श्रीचण्डिका के ध्यान में निमग्न होकर आसन पर बैठना चाहिए तथा दोनों हाथ जोड़कर **'ॐ सर्वस्वरूपे सर्वेशे'** इस मन्त्र से आरम्भ कर **'लोकानां वरदा भव'** तक के मन्त्रों से प्रणाम कर, प्रार्थना कर मनोवाञ्छित कामना का श्रीदेवी से निवेदन कर संहारमुद्रा के द्वारा श्रीदेवी को अपने हृदयकमल में अवस्थित होने की भावना करे। फिर अर्घ्यपात्र उठाकर—

"ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि।
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥"

इस मन्त्र को पढ़कर विसर्जन करना चाहिए।

निर्माल्य को पवित्र स्थान पर विसर्जित कर आनन्दपूर्वक विहार करे।

साधक इस क्रम से नवार्ण मन्त्र अथवा सप्तशती स्तोत्र की विधिवत् आराधना करके, अपनें मनोवाञ्छित फलों को प्राप्त करता है।

खिलमार्कण्डेय क्रम के अनुसार श्रीचण्डिका पूजापद्धति समाप्त हुई।

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

अथ शतचण्डीपाठ–पद्धतिः ।

तत्र अनावृष्ट्याद्यखिलदुरितोपशान्त्यर्थं राज्यावाप्त्यादिसकलकामनासिद्ध्यर्थं च उक्तलक्षणसंपन्नो यजमानः शिवालयसमीपे समे भूतले यथोक्तलक्षणं मण्डपं विधाय तन्मध्ये यथोक्तलक्षणां वेदीं निर्माय तस्या ईशानकोणे यथोक्तलक्षणं चतुरस्रं कुण्डं विरच्य तथा यथोक्तलक्षणान् नव ब्राह्मणान् दशममाचार्यं सर्वलक्षणसंपन्नमिति दश विप्रान् प्रमाणोक्तमधुपर्क-विधानेन आचार्यब्रह्मर्त्विगष्टकत्वेन वरणपूर्वकमर्चयित्वा आचार्याय इतरब्राह्मणापेक्षया द्विगुणां वरणसामग्रीं दत्वा तदनुज्ञया शुभासने समुपविष्टः सपत्नीकः तैः कृतस्वस्त्ययनः सुतबन्धु-सुहृद्वृतो वेदघोषनानावादित्रस्वनपूर्वकं ब्राह्मणैः सह चण्डिकामण्डपं गत्वा प्राग्वद् द्वारपूजां कृत्वा पश्चिमद्वारेण मण्डपं प्रविश्य कृताञ्जलिराचार्याय चण्डिकापूजार्थमनुज्ञां दद्यात् । तत आचार्यः प्राप्तानुज्ञः प्रागुक्तपूजाप्रकरणोक्तक्रमेण स्नानादिचण्डिकातर्पणान्तं कर्म विधायाचम्य प्राणायामं संकल्पं च विधाय प्रागुक्तनवचण्डिकाविधानवद् दिग्देवीः संपूज्य बलिं दत्वा मण्डपे कश्चित् पीठे ग्रहमण्डलं निर्माय तत्र स्वशाखोक्तविधिना नवग्रहान् संपूज्य तत्तद्वैदिकमन्त्रै र्लोकपालान् दिक्पालाँश्च संपूज्य वेद्यां प्रागुक्तविधिना प्रधानकुम्भं संस्थाप्य मण्डपस्य बहिः पूर्वादितो नित्यपूजाप्रकरणोक्तप्रकारेण चतुर्दिक्षु बलिं भूतादिभ्यो दत्वा मण्डपस्य पूर्वादिद्वार-चतुष्टये प्रतिद्वारं पूर्वोक्तविधिना द्वौ द्वौ कुम्भौ गालितोदकपूर्णौ संस्थाप्याचम्य वेद्यां स्वासन-

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

मास्तीर्य तत्संपूज्योपविश्य बद्धपद्मासनः चण्डिकां ध्यात्वा पूजाप्रकरणोक्तक्रमेण भूतशुद्ध्यादिकं विधाय मूलेन प्राणायामत्रयं कृत्वा मूलमन्त्रस्यर्ष्याद्यखिलं न्यासजातं विधाय प्रधानकुम्भे पीठपूजापुरःसरं चण्डिकामावाह्य सचक्रां साङ्गां सावरणां ध्यात्वा नित्यपूजोक्तविधिना अर्घ्यादिस्थापनपूर्वकं सम्यक् संपूज्य परितोषयेत् । अत्र पूजासामग्री तु अशीतिगुञ्जामिता कस्तूरी । तावन्मानं कुंकुमम् । तावज्जातीफलम् । तावान् कर्पूरः । एतच्चतुष्टयं पलमात्रचन्दनेन घर्षयेत् । तेन पलद्वयमनुलेपनं भवति । पलं तु विंशत्युत्तरत्रिंशद्गुञ्जामितम् । अत्युत्कृष्टं वस्त्रं तु मानानुक्तेः स्त्रीजनपरिधानयोग्यं ग्राह्यम् । गद्याणकमानं तु लौकिकतोलकार्धम् । पञ्चविंशतिर्दीपा घृतपूरिताः । कुडवद्वयमात्रं हविष्यान्नं नैवेद्यम् । शतद्वयं नागवल्लीदलम् । तदनुरूपं पूगफलं कर्पूरं खदिरसारादि ग्राह्यम् । इत्थं पूजासामग्रीं संपाद्य नवभिर्ब्राह्मणैः सह महालक्ष्मीं साङ्गां सावरणां संपूज्य आचार्यो ब्राह्मणेभ्यो बहुमानपुरःसरं सप्तशतीपाठार्थमाज्ञां दद्यात् । अत्र यावच्छ्रीदेव्याः पूजनं तावत् सर्वे ब्राह्मणाः जयचण्डीति ब्रुवन्तस्तां ध्यायेयुः । ततस्ते ब्रह्मादयो विप्रा वेद्यामाचार्यसंनिधौ पूजिते स्वे स्वे आसने समुपविश्य भूतशुद्ध्याद्यखिलं न्यासजातं विधाय सुसंहृष्टमनसश्चण्डिकाध्यानपूर्वकं विधिवच्चरितत्रयं सरहस्यं जपित्वोत्थाय श्रीमहालक्ष्मीं प्रदक्षिणनमस्कारैः पुनः पुनः परितोष्यासने समुपविश्य प्रार्थनाश्लोकान् पठित्वा यजमानस्येष्टानि फलानि पुनः पुनः प्रार्थयेरन् । ततो यजमानः भक्तियुक्तः सुलक्षणाः दश

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

कुमारीर्वक्ष्यमाणक्रमेण संपूज्य संभोज्य ताम्बूलदक्षिणाभिः परितोष्य पश्चादतिभक्तिपूर्वकमाचार्यादि दशविप्राँस्तथैव भोजयित्वा बन्धुभिः सार्धं स्वयमपि भुक्त्वा नृत्तगीतवादित्रनिःस्वनै र्वेदघोषैः सत्कथाभिश्च निशां नयेत् । ततो द्वितीयदिवसे आचार्यादयः स्नात्वा नित्यक्रियां निर्वर्त्य ध्यानपूर्वकं सर्वं चण्डिकातर्पणादिकं कृत्वा दिग्देवीपूजनं च कृत्वा बहिर्भूतबलिं दत्वा श्रीदेवीं प्रदक्षिणीकृत्य प्रणम्य अतिमनोहरे पूजामण्डपे स्वे स्वे चासने समुपविश्य 'जय चण्डि' इति जपन्तो यावद्दुर्गापूजनं भवति तावत्तिष्ठेयुः । आचार्योऽपि पूर्वदिवसापेक्षया यजमानेन संपादितै र्द्विगुणवस्त्राभरणगन्धपुष्पादिसमस्तपूजाद्रव्यै र्विशेषतः पूजां कृत्वा द्विगुणं परितोषणं भगवत्याः कुर्यात् । ततः साचार्या ब्राह्मणा द्विगुणं जपं पाठं च कुर्युः । ततो यजमानः द्विगुणं कुमारीब्राह्मणभोजनं च कारयित्वा पूर्ववद् रात्रौ जागरणमपि कुर्यात् । एवं तृतीयेऽहनि त्रिगुणं पूजाजपपाठकुमारीब्राह्मणभोजनादि विधेयम् । एवमेव चतुर्थेऽहनि चतुर्गुणं सर्वं कुर्यात् । ततः पञ्चमे दिवसे वक्ष्यमाणविधिना अग्निं संस्थाप्य तत्र घृततिलसहितपायसेन जपदशांशेन चरितत्रयस्य सरहस्यस्य प्रतिश्लोकेन 'नमो देव्यै महादेव्यै' इति श्लोकेन वा पूजाप्रकरणोक्तेन नवाक्षरमन्त्रेण वा होमं कृत्वा दिग्देवीनां नाममन्त्रेण प्रत्येकं शतशतसंख्या पायसेन तत्तन्नाम्ना हुत्वा नवग्रहाणां वेदोक्ततत्तन्मन्त्रेण तस्य तस्योक्तसमिद्भिर्घृतैश्चरुभिस्तिलैश्च प्रतिद्रव्येण शतं शतमेकैकस्य हुत्वा वैदिकमन्त्रै स्तैरेव द्रव्यैः शतं शतमाचार्यादयो द्विजा जुहुयुः । इत्थं होमं

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

संपाद्य श्रीदेवीं प्रणम्य यजमानस्तम्भद्वये स्रुचं निधाय घृतकुम्भदशांशेन घृतेन 'मूर्द्धानं दिवो अरतिमिति' वैदिकमन्त्रेण अच्छिन्नधारया पूर्णाहुतिं जुहुयात् । अथवा नवाक्षरमन्त्रेण पूर्णाहुतिं दद्यात् । ततो वक्ष्यमाणविधिना संस्रवप्राशनं प्रणीतामार्जनं च कृत्वा जपं हुतं च श्रीमहालक्ष्म्यै निवेद्य मनोरथं प्रार्थयित्वा यजमानो ब्राह्मणाय निष्कषट्कहेमसमेतं वस्त्रालंकारयुक्तं गोमिथुनद्वयं दत्वा 'यस्याः प्रभावमतुलमिति' श्लोकं कृताञ्जलिः पठित्वा आचार्यं प्रणम्योक्तलक्षणं गोमिथुनाष्टकं तस्मै दत्वा अष्टर्त्विग्भ्यश्चैकैकं गोमिथुनमेकैकमुक्तलक्षणं दद्यात् । ततो यजमानं शान्तचित्तं सुखासने समुपवेश्य आचार्यः ऋत्विजश्च कुंकुमाक्षतदूर्वाचन्दनदधीन्यादाय चतुर्णां स्तोत्राणां श्लोकमेकमेकं चोच्चार्याशीर्वादं दद्युः । ततो यजमानः सभार्यः सपुत्रः कृताशीर्वादमङ्गलः श्रीमहालक्ष्मीपरायणो रत्नपुष्पाञ्जलिं देव्यै दत्वा श्रीदेवीं विसृज्य ब्राह्मणेभ्यो भूरि दानं दत्वा मङ्गलघोषशान्तिपाठादिवेदघोषं कुर्वद्भिः सह ब्राह्मणैर्बन्धुभिर्भृत्यवर्गैरिष्टसुहृद्भिः सार्धं तोरणाद्यलंकृतं स्वगृहं प्रविशेदिति शिवम् ।

॥ इति शतचण्डीयज्ञविधिः ॥

CSU-Jaipur Campus Collection

Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

शतचण्डी विधान का हिन्दी अनुवाद

अनावृष्टि, महामारी आदि समस्त उपद्रवों तथा अमङ्गलों की शान्ति हेतु एवं सभी मनोकामनाओं की पूर्ति हेतु शतचण्डी पाठ विधान भारतवर्ष में चिरकाल से प्रचलित है। अतः यहां संक्षिप्त शत-चण्डी विधान प्रस्तुत किया जाता है—

शिवालय के समीप समतल भूमि पर शास्त्रीय विधानानुसार मण्डप एवं वेदी का निर्माण कर वेदी के ईशान कोण में चतुरस्र कुण्ड बनाना चाहिये। अनन्तर, यजमान आचार्य सहित दश कर्मनिष्ठ ब्राह्मणों अर्थात् आचार्य, ब्रह्मा एवं आठ ऋत्विजों का मधुपर्क विधान से वरण कर अर्चन करे। अन्य ब्राह्मणों की अपेक्षा आचार्य को दुगुनी वरण सामग्री देकर उसकी आज्ञा प्राप्त कर सपत्नीक आसन पर बैठकर ब्राह्मणों द्वारा स्वस्तिवाचन करने के बाद वेदघोष और माङ्गलिक वाद्य के साथ पुत्र एवं बन्धुओं और मित्रों के साथ ब्राह्मणों सहित मण्डपस्थल पर जाकर द्वार पूजा करे एवं पश्चिम द्वार से मण्डप में प्रविष्ट होकर चण्डिका पूजन करने हेतु आचार्य को अनुमति प्रदान करे। अनन्तर, आचार्य पूजा प्रकरण में निर्दिष्ट सामग्री के साथ चण्डिका के स्नान एवं तर्पणान्त कर्म सम्पादन करने के बाद आचमन, प्राणायाम तथा संकल्प के साथ विधि पूर्वक दिग्देवियों का पूजन कर, बलि देकर मण्डप में किसी चौकी पर ग्रह-मण्डल बनाकर, वैदिक मन्त्रों से अपनी शाखोक्त विधान के अनुसार नवग्रहों, लोकपालों एवं दिक्पालों का पूजन कर विधि पूर्वक वेदी पर प्रधान कलश की स्थापना करे। मण्डप के बाहर नित्य पूजा एवं निर्दिष्ट क्रम से पूर्वादि दिशाओं में भूतबलि देकर चारों द्वारों पर दो दो जलपूर्ण कलश स्थापित कर, आचमन कर वेदी पर आसन बिछाकर उसकी पूजा करे और उस पर पद्मासन से बैठकर चण्डिका का ध्यान कर भूतशुद्धि करे। अनन्तर, मूलमन्त्र एवं प्राणायाम से ऋष्यादि सभी न्यासों को करके प्रधान कलश में पीठ पूजा सहित चण्डिका का आवाहन कर, सम्पूर्ण आवरण एवं अङ्ग देवताओं

CSU-Jaipur Campus Collection
Digitization: HHFA(USA). Funding: Shastry Family, Mattur, Shivamogga KN

